दीपिका

८

कक्षा ८ के लिए संस्कृत की पाठ्यपुस्तक

Table of Contents

- 1
- 2
- 3
- 4
- 5
- 6
- 7
- 8
- 9
- 10
- 11
- 12
- 13
- 14
- 15
- 16
- 17
- 18
- 19
- 20
- 21
- 22
- 23
- 24
- 25

उत्तर प्रदेश बेसिक शिक्षा परिषद्

वर्तिका - ८

(कक्षा ८ के विद्यार्थियों के लिए)

वैदिक वन्दना

तेजोऽसि तेजो मयि धेहि,
वीर्यमसि वीर्यं मयि धेहि,
बलमसि बलं मयि धेहि,
ओजोऽसि ओजो मयि धेहि।
पश्येम शरदः शतम्। जीवेम शरदः शतम्।
शृणुयाम शरदः शतम्। प्रब्रवाम शरदः शतम्।।
अदीनाः स्याम शरदः शतम्। भूयश्च शरदः शतात्।
ऊँ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः।
शं नो विष्णुरुरुक्रमः। ऊँ शान्तिः शान्तिः शान्तिः।।
-यजुर्वेदः

शब्दार्थाः

(हे भगवन् तुम) तेजोऽसि = तेज स्वरूप हो। धेहि = स्थापित करो, प्रदान करो। वीर्यम् = शक्ति को। बलम् = सामथ्र्य को। ओजोऽसि = (तुम) ओज के स्रोत हो। ओजः = ओज को। (हे भगवन्! आपकी कृपा से हम सभी) शतं शरदः = सौ वर्ष तक। पश्येम = देखें। जीवेम = जीवित रहें। शृणुयाम = सुनें। प्रब्रवाम = बोलें। अदीनाः = समर्थ। स्याम = होवें। भूयः = अधिक। मित्रः = मित्र देव, आदित्य देव। नः = हम लोगों के लिए। शम् = कल्याणकारी हो। वरुणः = वरुण देव। अर्यमा = सूर्य। उरुक्रमः = विशाल पग वाले।

भावार्थाः-

हे ईश्वर ! तुम तेज स्वरूप हो। अतः मुझमें तेज स्थापित करो। तुम शक्ति स्वरूप हो अतः मुझमें शक्ति स्थापित करो। तुम सामथ्र्यवान् हो अतः मुझमें सामथ्र्य स्थापित करो। तुम ओज स्वरूप हो अतः मुझमें ओज स्थापित करो। ।। 1 ।।

हम सब सौ वर्षो तक देखें, हम सब सौ वर्षों तक जीवित रहें, हम सब सौ वर्षों तक सुनें, हम सब सौ वर्षों तक बोलें, हम सब सौ वर्षों तक सामथ्र्यवान् रहें और हम सब सौ वर्षों से अधिक देखें जीवित रहें, सुनें, बोलें, सामथ्र्यवान् होवें ।। 2 ।।

हे परब्रह्म ! मित्र देव (सूर्य) हम लोगों के कल्याण के लिए हों। वरुणदेव हम लोगों के कल्याण के लिए हों। अर्यमा(सूर्य/पितरों के देवता)हम लोगों के कल्याण के लिये हो। इन्द्र और बृहस्पति हमारे कल्याण के लिए हों, विशाल पग वाले विष्णु हम लोगों के कल्याण के लिए हों। (सर्वत्र) शान्ति हो, शान्ति हो, शान्ति हो। ।। 3 ।।

शिक्षण-सङ्केतः

वन्दनायाः कक्षायां सस्वरं सामूहिकं पाठं कारयत।

वदतु संस्कृतम्
विद्यालये उपस्थितेः चिन्ता
प्रभा -निर्मले ! कथं धावसि ?
निर्मला -विद्यालयं गच्छामि भगिनि !
प्रभा -कथं धावन्ती गच्छसि ?
निर्मला -अद्य विलम्बः जातोऽस्ति ।
प्रभा -कथं विलम्बं कृतवती ?
निर्मला -पठने लेखने च संलग्ना आसम् ।
प्रभा -इदं तु प्रतिदिनं करोषि ?
निर्मला -परन्तु अद्य विशेषरूपेण कृतवती अस्मि ।
प्रभा -कथम् ?
निर्मला -यतः गतदिने अस्माकम् अध्यापिका प्रबोधितवती यत् या बालिका श्वः पाठं पठितवती न भविष्यति, लेखं लिखितवती न भविष्यति, पद्यं अभ्यस्तं कृतवती न भविष्यति, सा पुरस्कृता न भविष्यति ।
प्रभा -एवम् ?
निर्मला -आम् । अत एव सर्वं कार्यं कृत्वा इदानीं धावन्ती गच्छामि।
प्रभा -अथ भोजनं कृतवती ? अभुक्ता एव वा गच्छसि ?
निर्मला -अवसर एव नासीत् भोजनस्य। मध्याह्ने आगत्य करिष्यामि।
प्रभा -ईदृशस्ते अध्ययने अनुरागो यद् भोजनमपि परित्यजसि !
निर्मला -नहि, विलम्बकारणाद् एवं विहितम् ।
प्रभा -ज्ञातम्, तथापि सावधानं गच्छ । पतिष्यसि खलु ।
निर्मला -बाढम्, अनुगृहीता अस्मि ।
विशेषः-इत्थं बालकेषु परस्परं संस्कृत-सम्भाषणस्य कौशल-विकासं कारयत।

प्रथमः पाठः आश्रमः

(अनुस्वारसन्धिः श्चुत्वसन्धिश्च)

अस्माकं प्रदेशस्य सीतापुरजनपदे नैमिषारण्यं प्राचीनं तीर्थस्थलम् अतीव प्रसिद्धम् अस्ति। तत्र पुरा काले एकस्मिन् आश्रमे ऋषयः मुनयः गुरवः कवयः छात्राश्च निवसन्ति स्म। आश्रमस्य विशाले परिसरे अश्वत्थ-वट-निम्बाशोक-वृक्षाणां गहना छाया परिव्याप्तासीत्। तत्र फलशालिनः आम्रामलक-पनस-पेरुवृक्षाः अपि विपुलाः आसन्। एभिः वृक्षैः तत्र पर्यावरणम् अत्यन्तं शुद्धमासीत्, येन शीतलाः वायवः मन्दं-मन्दं निरन्तरं वहन्ति स्म, काले-काले च मेघः वर्षति स्म।



इदानीमपि तस्मिन् आश्रमे धेनवः बलीवर्दाः अश्वाः अन्ये च पशवः स्वच्छन्दं चरन्ति। वृक्षेषु कपीनां कूर्दनम्, चटकानां कूजनम्, मयूराणां नर्तनम् च दर्शकेभ्यः आनन्दं ददति।

तस्याश्रमस्य समीपे गोमती नदी प्रवहति। तस्याः निर्मलं जलं सर्वे आश्रमवासिनः पिबन्ति स्म। आश्रमे पशवः पक्षिणश्च विरोधं विहाय एकस्मिन् घट्टे पानीयम् पिबन्ति स्म, एकत्र वसन्ति स्म, तत्रैव खादन्ति स्म च।

तत्र छात्राणां कृते एते नियमाः आसन्-प्रातः सूर्योदयात् पूर्वम् उत्थातव्यम्, नद्यां स्नानं कर्तव्यम्, सन्ध्यावन्दनं करणीयम्, ईश्वरः नमनीयः सहैव खादनीयं ततः पठनाय कक्षायां गन्तव्यम्। एतान् आश्रमनियमान् सर्वे छात्राः सम्यक् पालनं कुर्वन्तः आसन्।

सम्प्रत्यपि आश्रमोऽयं छात्रेभ्यः श्रेष्ठं संस्कारं प्रयच्छति। तत्र जातिगतं भेदभावं विना सर्वे निवसन्ति। स्वास्थ्य-संवर्धनाय तत्र व्यायामस्य, योगस्य प्राकृतिकचिकित्सायाश्च शिक्षणं प्रचलति। स च आश्रमः त्यागं तपस्यां परोपकारम् उदारतां च शिक्षयति। एवञ्च एतादृशः आश्रमः इदानीं सर्वत्र भवेत्।

शब्दार्थाः

पुराकाले = प्राचीन काल में। अश्वत्थः = पीपल। परिव्याप्ता = चारों ओर फैला हुआ। आमलकः = आँवला। पनसः = कटहल। पेरु = अमरूद। बलीवर्दः = बैल। कूर्दनम् = कूदना। चटकानाम् = चिड़ियों का। विहाय = छोड़कर। सम्प्रत्यपि (सम्प्रति$अपि) = इस समय भी।

अभ्यासः

1. उच्चारणं कुरुत-

नैमिषारण्यम् अश्वत्थम् पक्षिणश्च चिकित्सायाश्च प्रयच्छति परिव्याप्तासीत् सम्प्रत्यपि आम्रामलकम्

2. एकपदेन उत्तरत -

(क) आश्रमस्य समीपे का नदी प्रवहति ?

(ख) काले काले कः वर्षति स्म ?

(ग) वृक्षेषु कस्य कूर्दनम् आनन्दं ददाति ?

(घ) आश्रमे भेदभावं विना के निवसन्ति ?

(ङ) अस्माकं प्रदेशस्य कस्मिन् जनपदे नैमिषारण्यम् अस्ति ?

3. प्रश्नानाम् उत्तराणि लिखत -

(क) आश्रमे स्वच्छन्दं के के विचरन्ति ?

(ख) स्वास्थ्यसंवर्धनाय आश्रमे किं किं भवति ?

(ग) छात्राणां कृते आश्रमे के के नियमाः आसन् ?

(घ) आश्रमः किं किं शिक्षयति ?

4. उचितं मेलनं कृत्वा लिखत -

‘क’ ‘ख’

सूर्योदयपूर्वम् खादनीयम्

स्नानम् गन्तव्यम्

सहैव उत्थातव्यम्

पठनाय कक्षायाम् कर्तव्यम्

5. अधोलिखित.पदानां सन्धि-विच्छेदं कुरुत -

विरोधं विहाय = ... + ...

प्राचीनं तीर्थस्थलम् = ... + ...

पक्षिणश्च = ... + ...

छात्राश्च = ... + ...

6. उदाहरणानुसारं पदरचनां कुरुत -

अपश्यत् - पश्यति स्म।

अलिखत् - ....

अपिबत् - ....

अगच्छत् - ....

7. विचिन्त्य उत्तराणि लिखत -

(क) फलदायकानां पञ्चवृक्षाणां नामानि लिखत।

(ख) अनुस्वारसन्धियुक्तानि पञ्चवाक्यानि लिखत।

(ग) जीवने वृक्षाणाम् उपयोगं लिखत।

ध्यातव्यम्-
स्म इत्यस्य प्रयोगः-
यदा वर्तमान-कालिकैः धातुभिः सह ‘स्म’ इत्यस्य प्रयोगः भवति तदा ते धातवः
भूतकालिक-क्रियाणाम्
अर्थान् प्रकटयन्ति।
यथा-पठति स्म = पढ़ता था।
गच्छति स्म = जाता था।
वसन्ति स्म = रहते थे।
खादतः स्म = वे दोनों खाते थे।
वदतु संस्कृतम्
नमस्कारः = नमस्कार।
नमस्ते/नमो नमः = नमस्ते।
हरिः ओम् = हॅलो।
श्रीमन्/मान्ये = सर/मैडम। (सम्बोधन)
धन्यवादाः = धन्यवाद।
स्वागतम् = स्वागत।
क्षमां करोतु/क्षम्यताम् = क्षमा कीजिए।
नास्ति चिन्ता = कोई बात नहीं।
कृपया = कृपया।
आम् = हाँ।
न/नहि = नहीं।
उत्तमम्/अत्युत्तमम् = अच्छा/बहुत अच्छा।
हार्दिक्यः शुभकामनाः = हार्दिक शुभकामनाएँ।
अभिनन्दनम् = अभिनन्दन।
पुनः मिलामः = फिर मिलेंगे।
विशेष-एवमेव बालकेषु परस्परं वार्तालापस्य प्रवृत्तेः विकासं कारयत।
शिक्षण-सङ्केतः-गुरुकुल-शिक्षापद्धति-विषये आश्रमीयजीवनविषये च चर्चां कारयत।

द्वितीयः पाठः मातृदेवो भव

(पूर्वरूपसन्धिः लङ्लकारश्च)

मुकुलः एकः छात्रोऽस्ति। तस्य एकं मित्रम् अस्ति। तस्य नाम सतीशः अस्ति। एकदा सतीशस्य जननी ज्वरेण पीडिता अभवत्। सा अवदत्- "भो सतीश ! गच्छ, वैद्यम् आनय।" सतीशोऽवदत् -"अयं मे क्रीडनस्य कालः। मम मित्राणि आगच्छन्ति। अहं क्रीडनार्थं गच्छामि।" इति उक्त्वा सः बहिः अगच्छत्।

तस्मिन् एव काले सतीशस्य मित्रं मुकुलः तत्र प्राप्तः। सः सतीशस्य जननीं ज्वरेण पीडिताम् अपश्यत्। सः ताम् अपृच्छत्- "कुत्र सतीशः गतः" इति। सा अवदत्- " मित्रैः सह क्रीडितुं गतः।" मुकुलः दुःखितोऽभवत्। सः बहिः अगच्छत्।

सः सतीशं क्रीडाक्षेत्रात् गृहम् आनयत् अवदत् च- हे मित्र! एषा तव जननी ज्वरपीडिता अस्ति। त्वया अस्याः सेवा कर्तव्या। किं त्वं न जानासि अस्माकम् उपनिषद् उपदिशति- 'मातृदेवो भव' इति। अन्यदपि उक्तम्-

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते, आयुर्विद्या यशो बलम्।।

"अधुना त्वं सत्वरं गच्छ, शीघ्रं चिकित्सकम् आनय" इति श्रुत्वा सतीशः वैद्यम् आनयत्। तस्य जननी प्रमुदिताऽभवत्।

शब्दार्थाः

ज्वरेण = बुखार से। वैद्यम् = वैद्य को। उक्त्वा = कहकर। तत्र प्राप्तः = वहाँ पहुँचा। क्रीडितुम् = खेलने के लिए। क्रीडाक्षेत्रात् = खेल के मैदान से। आनयत् = लाया। उपनिषद् उपदिशति = उपनिषद सीख देती है। अन्यद् अपि उक्तम् = और भी कहा गया है। चत्वारि = चार। सत्वरम् = शीघ्र। प्रमुदिता = प्रसन्न।

अभ्यासः

1 उच्चारणं कुरुत -
छात्रोऽस्ति वृद्धोपसेविनः क्रीडितुम्
अपृच्छत् दुःखितोऽभवत् अभिवादनशीलस्य
2 एकपदेन उत्तरत -
(क) सतीशस्य जननी केन पीडिता आसीत् ?
(ख) मुकुलः कस्य मित्रम् अस्ति ?
(ग) कः दुःखितोऽभवत् ?
(घ) कः वैद्यम् आनयत् ?
3 कः/का, उक्तवान्/ उक्तवती इति लिखत- माता/मुकुलः/सतीशः
(क) भोः सतीश! गच्छ वैद्यम् आनय। ....
(ख) अहं क्रीडनार्थं गच्छामि। .... (ग) मित्रैः सह क्रीडितुं गतः। ....
(घ) हे मित्र ! एषा तव जननी ज्वरपीडिता अस्ति। .... 4 पूर्णवाक्येन उत्तरत -
(क) मुकुलः सतीशस्य मातरम् किम् अपृच्छत्।
(ख) सतीशः किम् उक्त्वा बहिः अगच्छत् ?
(ग) उपनिषद् किम् उपदिशति ?
(घ) सः सतीशं कुतः आनयत् ?
5 प्रश्नानाम् उत्तराणि लिखत -
(क) सतीशस्य जननी कदा प्रमुदिता अभवत् ? (ग) किं श्रुत्वा सतीशः वैद्यम् आनयत् ?
(ख) आयुर्विद्या यशोबलं कस्य वर्धन्ते ? (घ) सतीशः कुत्र अगच्छत् ?
6 अधोलिखित-पदानां विभक्तिं वचनम् च लिखत -
पदम् विभक्तिः वचनम्
यथा- ज्वरेण तृतीयाविभक्तिः एकवचनम्
मित्राणि ....
ताम् ....
क्रीडाक्षेत्रात् ....
7 अधोलिखितपदानां लकारपुरुषवचनानि लिखत -
पदम् लकारः पुरुषः वचनम्
यथा- अवदत् लङ्लकारः प्रथमपुरुषः एकवचनम्
अपठत् ....
गच्छ ....
8 विचिन्त्य लिखत-

यदि भवतः सहपाठी रुग्णः स्यात् तदा भवान् किं करिष्यति ? इति लिखत।
शिक्षण-सङ्केतः- कक्षायां चर्चां कारयतु
(क) मातुः पितुः श्रेष्ठजनानां च सत्काराय बालकाः किं किं कुर्वन्ति।
(ख) क्रीडनं लाभदायकमस्ति परन्तु गृहे समस्यासु आगतासु प्रथमं किम् आवश्यकम् अस्ति।
न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।

तृतीयः पाठ अस्माकम् उत्सवाः

(यण्सन्धिः, 'अदस्' - शब्दस्य रूपाणि, तत्पुरुषसमासश्च)

दीपावली प्रकाशस्य महोत्सवः अस्ति। असौ महोत्सवः कार्तिक्याम् अमावस्यायाम् संघटते। अमुष्मिन् दिने भगवान् रामचन्द्रः चतुर्दशवर्षमितं स्वकीयं वनवासं परिसमाप्य रावणवधानन्तरम् अयोध्यां प्रत्यागच्छत्। ततः प्रभृत्ययम् उत्सवः प्रचलति। अमुष्मिन् महोत्सवे रात्रौ महालक्ष्मीपूजनं भवति। तत्र देवीं वयं सर्वे धनधान्यादिकं याचामहे। सर्वे जनाः स्वकीयान् गृहान् दीपमालया सज्जयन्ति। सायं वयं वीथीस्वापणेषु मार्गेषु गृहेषु च सर्वत्र दीपकानां प्रकाशं पश्यामः। अहो! कियत् चाकचिक्यम् प्रतिभवनेषु विद्युद्दीपानाम्।

उत्सवेषु दीपावली प्रमुख उत्सवो वर्तते। अस्माकं देशे अन्ये अप्युत्सवाः सन्ति। रक्षाबन्धनम्, विजयादशमी,होलिकोत्सव इत्यादयः।



कार्तिकमासस्यैव पूर्णिमायां गुरुनानकदेवस्य जयन्ती भवति। अस्यामेव तिथौ गुरुनानकदेवस्य जन्म अभवत्। सिक्खधर्मावलम्बिनः जनाः अस्मिन् दिने विशेषरूपेणोत्सवान् आयोजयन्ति। तैः सह तेषाम् इष्टमित्राण्यपि इदं पर्व मानयन्ति। ते गुरुद्वारं परिवारजनान् नयन्ति। तत्र शिरः नत्वा ते 'गुरुग्रन्थसाहेब' इति नामधेयं स्वकीयं धर्मग्रन्थं शृण्वन्ति, मित्रैः सह संलपन्ति आनन्दं लभन्ते च।

अमुष्मिन् पर्वणि सिक्ख-महानुभावाः सर्वेभ्यः समागतेभ्यः जनेभ्यः संयावं प्रसादरूपेण वितरन्ति। भजनकीर्तनादि-कार्यक्रमेण सह ते शोभायात्राम् अप्यायोजयन्ति।

चतुर्दशवर्षमितं स्वकीयं वनवासं परिसमाप्य

ईसाईजनानां रमणीयं पर्व क्रिसमस- नामकम् अस्ति। अदः पर्व दिसम्बरमासस्य पञ्चविंशतितमे दिवसे भवति। अमुष्मिन् दिवसे परमकारुणिकः ईसामसीहः स्वजन्मना भुवमलङ्कृतवान्। जनाः 'गिरजाघर' नामधेयेषु ईष्टोपासनामन्दिरेषु प्रार्थनां कुर्वन्ति, ईशस्य कृपां च लभन्ते। गृहे-गृहे क्रिसमसवृक्षस्य निर्माणमपि भवति। सान्ताक्लाजः शिशुभ्यः उपहारान् प्रयच्छति। निशीथे असौ महोत्सवः पराकाष्ठाम् आरोहति।



’ईद उल फितर’ नामधेयं पर्व मुस्लिमसमाजस्य कल्याणकरमस्ति। अमुष्यायोजनं रमजानमासस्य समाप्तौ भवति। रमजानमासे मुस्लिमजनाः एकमासं दिवा उपवसन्ति। केवलं रात्रौ एव मिलित्वा खादन्ति। सम्बन्धिनां मित्राणां च गृहं गच्छन्ति, परस्परं वर्धापयन्ति, सुपरिचितेभ्यः मिष्टान्नादिकं वितरन्ति मनोहराण्यभिनवानि वस्त्राणि धारयन्ति च। ईदमहोत्सवे ते स्वमित्रैः सम्बन्धिभिश्च सह परस्परम् आलिङ्गनं कुर्वन्ति।

शब्दार्थाः

संघटते = पड़ता है। अमुष्मिन् दिने = इस दिन। चतुर्दशवर्षमितम् = चैदह वर्ष पर्यन्त। प्रत्यागच्छत् = वापस आए। ततः प्रभृति अयम् = तभी से यह। याचामहे = माँगते हंै। वीथीषु= गलियों में/मार्गों में। आपणेषु = दुकानों में। चाकचिक्यम् = चकाचैंध। नयन्ति = ले जाते हैं। नत्वा = झुका कर। संयावम् = हलवा को। परमकारुणिकः = अत्यन्त दयावान्। भुवम् अलङ्कृतवान् = पृथ्वी को सुशोभित किया। नामधेयेषु = नामक। उपहारान् = भेंट को। प्रयच्छति = देता है। निशीथे = मध्यरात्रि में। पराकाष्ठाम् = चरम सीमा पर। दिवा उपवसन्ति = दिन में उपवास करते हैं। वर्धापयन्ति = बधाई देते हैं। मनोहराणि अभिनवानि = सुन्दर और नये। आलिङ्गनम् = गले मिलना।

अभ्यासः

1 उच्चारणं कुरुत -

कार्तिक्याम् ख्रीष्टोपासनामन्दिरेषु सज्जयन्ति चतुर्दशवर्षमितम्
ईद उल फितर इष्टमित्राण्यपि अलङ्कृतवान् सान्ताक्लाजः ईसामसीहः पराकाष्ठाम्
मिष्टान्नादिकम् सुपरिचितेभ्यः

2 एकपदेन उत्तरत -

(क) दीपावली कस्य महोत्सवः अस्ति ?
(ख) कार्तिकमासस्य पूर्णिमायां तिथौ कस्य जयन्ती भवति ?
(ग) सिक्खमहानुभावाः समागतेभ्यः जनेभ्यः प्रसादरूपेण किं वितरन्ति ?
(घ) ईसाईजनानां रमणीयं प्रमुखं पर्व किमस्ति ?

3 पूर्णवाक्येन उत्तरत -

(क) रामः अयोध्यां कदा प्रत्यागच्छत् ?
(ख) गुरुनानकदेवस्य जन्म कदा अभवत् ?

(ग) क्रिसमस-दिवसे गृहे-गृहे ंिकं भवति ?
(घ) रमजानमासे मुस्लिमजनाः किं कुर्वन्ति ?
4. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत -
यथा- दीपावली कस्य उत्सवः अस्ति ?
दीपावली प्रकाशस्य उत्सवः अस्ति।
(क) दीपावली महोत्सवे रात्रौ लक्ष्मीपूजनं भवति।
(ख) सिक्खधर्मावलम्बिनः गुरुग्रन्थसाहेब इति धर्मग्रन्थं शृण्वन्ति।
(ग) ईसाईजनानां रमणीयं पर्व क्रिसमसनामकम् अस्ति।
5. सन्धिविच्छेदं कुरुत -
यथा- वीथीष्वापणेषु = वीथीषु+आपणेषु।
प्रत्यागच्छत् = ...
इष्टमित्राण्यपि = ...
अप्यायोजयन्ति = ...
कार्तिकमासस्यैव = ...
विशेषरूपेणोत्सवान् = ...
6 समासविग्रहं कुरुत -
यथा-लक्ष्मीपूजनम् = लक्ष्म्याः पूजनम्।
सिक्खधर्मः = ...
ख्रीष्टोपासना = ...
पीताम्बरम् = ...
चोरभयम् = ...
7 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-
उपहारान् एकमासम् गुरुद्वारम् पराकाष्ठाम्
(क) सिक्खधर्मावलम्बिनः परिवारजनान् .... नयन्ति।
(ख) सान्ताक्लाजः शिशुभ्यः .... प्रयच्छति।
(ग) निशीथे असौ महोत्सवः .... आरोहति।
(घ) रमजानमासे मुस्लिमजनाः .... दिवा उपवसन्ति।
8 हिन्दीभाषायाम् अनुवादं कुरुत-
(क) ईसामसीहः क्रिसमसदिने स्वजन्मना भुवमलङ्कृतवान्।
(ख) रमजानमासस्य समाप्तौ ईद उल फितर नामधेयं पर्व आयोज्यते।
(ग) ईदमहोत्सवे जनाः सम्बन्धिनां मित्राणाञ्च गृहं गच्छन्ति।
(घ) सर्वे जनाः स्वकीयान् गृहान् दीपमालया सज्जयन्ति।
9 संस्कृते अनुवादं कुरुत -

(क) दीपावली प्रकाश का पर्व है।
(ख) हम सब धन-धान्य की याचना करते हैं।
(ग) सिक्खजन गुरुग्रन्थसाहेब को नमस्कार करते हैं।
(घ) ईसाई लोग क्रिसमस के दिन गिरजाघरों में प्रार्थना करते हैं।
10 विचिन्त्य लिखत -
(क) अस्माकं समाजे अन्ये के के उत्सवाः भवन्ति, तैः उत्सवैः समाजस्य कः लाभ ? इति लिखत।
शिक्षण-सङ्केतः विविध-धर्मावलम्बिनाम् उत्सवानां परस्परं सौहार्दविकासाय चर्चां कारयत।

चतुर्थः पाठः वर्धमानः महावीरः

भारतवर्षे प्रचलितेषु धर्मसम्प्रदायेषु जैनधर्मः महत्त्वं भजते। वर्धमानः महावीरः एतस्य जैनधर्मस्य अन्यतमः श्रेष्ठो महापुरुषः आसीत्। तस्य जन्म ईसापूर्वं 599 तमे वर्षे वैशालीनगरस्य कुण्डग्रामे अभवत्। बाल्यकाले तस्य नाम वर्धमानः इत्यासीत्। तस्य पितुः नाम सिद्धार्थः मातुश्च नाम त्रिशला इत्यासीत्। सः शैशवात् एव बुद्धिमान्,सदाचारसम्पन्नः विचारशीलश्च आसीत्। तस्य विवाहः यशोदानाम्न्या राजकुमार्या सह अभवत्। तस्य एका पुत्री प्रियदर्शिनी अजायत। वर्धमानः बाल्यकालादेव विरक्त आसीत्। समाजे प्रचलितः आडम्बरः, वर्गभेदः जीवहिंसा च तस्य मनसः विकलतायाः कारणानि आसन्। पितरि दिवङ्गते तस्य मनः शोकोद्विग्नमभवत्। मोहं मायां च परित्यज्य सः स्वभ्रातुः अनुमतिं गृहीत्वा संन्यासं गृहीतवान्। तदानीं सः त्रिंशद्वर्षवयस्क आसीत्। कठिनेन तपसा सः सत्यस्य शान्तेश्च अन्वेषणे प्रवृत्तोऽभवत्। द्वादशवर्षाणि यावत् तपः तप्त्वा सः ज्ञानं प्राप्नोत्। तपसा सः इन्द्रियाणि संनियम्य महावीरः जिनो वा अभवत्। जैनमतानुसारेण वर्धमानमहावीरात् पूर्वं त्रयोविंशतिः तीर्थङ्कराः अभवन्। महावीरः जैनधर्मस्य अन्तिमः चतुर्विंशः तीर्थङ्करः आसीत्।

ज्ञानप्राप्तेः अनन्तरं महावीरः त्रिंशत् वर्षाणि यावत् जैनधर्मस्य महता उत्साहेन प्रचारम् अकरोत्। शनैः शनैः भारतस्य प्रायशः सर्वेषु राज्येषु जैनधर्मस्य सम्यक् प्रचारः सञ्जातः। तेन प्रदर्शितेन मार्गेण जनाः कैवल्यं प्राप्तुं समर्थाः भवन्ति। तस्य मतेन न केवलं मनुष्याः, पशवः, पक्षिणः वा प्राणवन्तः, अपितु वृक्षादिषु प्रस्तरादिष्वपि प्राणाः सन्ति। महावीरस्य उपदेशानुसारेण सम्यक्-दर्शनम्, सम्यक्-ज्ञानम्, सम्यक्-चरित्रम् इति त्रिरत्नोपासनया जनाः मोक्षं लभन्ते। शुद्धाचरणाय सत्य-अहिंसा-अस्तेय-ब्रह्मचर्य-अपरिग्रह इति पञ्चमहाव्रतानां विधानं सः अकरोत्। साधारणजनैः सह बिम्बिसार-अजातशत्रुप्रभृतयो राजानः अपि तस्य उपदेशैः प्रभाविताः अभवन्। तेनोपदिष्टस्य मार्गस्य सत्यम् अहिंसा च आधारभूते स्तः। द्विसप्ततिवर्षवयसि पाटलिपुत्रसमीपे पावापुरीस्थाने महावीरः रुग्णो जातः निर्वाणं च प्राप्तः।

शब्दार्थाः

अन्यतमः = बहुतों में से एक/सर्वश्रेष्ठ। शैशवात् = बचपन से। सदाचारसम्पन्नः = सदाचार से युक्त। अजायत = उत्पन्न हुई। (जन् धातु, लङ्लकार, प्रथम पुरुष, एक वचन)। वर्गभेदः = ऊँच-नीच का भेद-भाव। विकलतायाः = व्याकुलता के। दिवङ्गते = मरने पर। शोकोद्विग्नम्

= शोक से सन्तप्त, बेचैन। तदानीम् = उस समय। प्रवृत्तः = लग गये। संनियम्य = नियन्त्रित करके। त्रयोविंशतिः = तेईस । चतुर्विंशः = चैबीसवें। कैवल्यम् = मोक्ष। प्राणवन्तः = सजीव। प्रस्तरादिषु = पत्थर आदि में। त्रिरत्नोपासनया = तीन रत्नों के पालन से। अस्तेयम् (न + स्तेयम्) = चोरी न करना। अपरिग्रहः = अपने पास कुछ न रखना। द्विसप्ततिवर्षवयसि = बहत्तर वर्ष की उम्र में। रुग्णः = रोगी।

अभ्यासः

1 उच्चारणं कुरुत -

वर्धमानः त्रिंशद्वर्षवयस्कः शोकोद्विग्नः अपरिग्रहः
दिवङ्गते बिम्बिसारः द्विसप्ततिवर्षवयसि त्रिरत्नोपासना।

2 एकपदेन उत्तरत -

(क) वर्धमानमहावीरस्य पितुः नाम किम् आसीत् ?
(ख) वर्धमानमहावीरस्य मातुः नाम किम् आसीत् ?
(ग) जैनधर्मानुसारेण त्रिरत्नोपासनया जनाः किं लभन्ते ?
(घ) जैनधर्मस्य अन्तिमः तीर्थङ्करः कः आसीत् ?

3 पूर्णवाक्येन उत्तरत -

(क) महावीरः कति वर्षाणि यावत् जैनधर्मस्य प्रचारम् अकरोत्।
(ख) महावीरस्य जन्म कुत्र अभवत् ?
(ग) महावीरस्य पुत्र्याः नाम किम् आसीत् ?
(घ) जैनमतानुसारेण महावीरात् पूर्वं कति तीर्थङ्कराः अभवन् ?

4 प्रश्नानामुत्तराणि लिखत -

(क) कानि पञ्चमहाव्रतानि सन्ति ?
(ख) त्रिरत्नानि कानि सन्ति ?
(ग) महावीरस्य उपदेशैः के के प्रभाविताः अभवन् ?
(घ) महावीरस्य मनसः विकलतायाः कानि कारणानि आसन् ?

5 मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत -

अकरोत् अभवत् गृहीतवान् आसीत्

(क) महावीरः जैनधर्मस्य श्रेष्ठः महापुरुषः ....।
(ख) महावीरस्य जन्म वैशालीनगरस्य कुण्डग्रामे ....।
(ग) जैनधर्मस्य प्रचारं महावीरः उत्साहेन ....।
(घ) त्रिंशद्वर्षवयसि मोहमायां परित्यज्य महावीरः संन्यासम् ....।

6 अधोलिखित-पदेषु सन्धि-विच्छेदं कुरुत -

मतानुसारेण = ... + ...

इत्यासीत् = ... + ...
उपदेशानुसारेण = ... + ...
त्रिरत्नोपासनया = ... + ...
7 हिन्दीभाषायाम् अनुवादं कुरुत -
(क) महावीरः जैनधर्मस्य अन्यतमः श्रेष्ठो महापुरुष आसीत्।
(ख) बाल्यकाले तस्य नाम वर्धमान इत्यासीत्।
(ग) वर्धमानः बाल्यकालादेव विरक्त आसीत्।
(घ) स इन्द्रियाणि सन्नियम्य जिनोऽभवत्।
8 संस्कृतभाषायाम् अनुवादं कुरुत -
(क) वर्धमान महावीर जैनधर्म के चैबीसवें तीर्थङ्कर थे।
(ख) महावीर की माता का नाम त्रिशला था।
(ग) पत्थर में भी प्राण है।
(घ) उस समय वे तीस वर्ष के थे।
शिक्षण-सङ्केत -
अहिंसा परमो धर्मः इति विषये चर्चां कारयत।

पञ्चमः पाठः स्फुटपद्यानि

काकः कृष्णः पिकः कृष्णः को भेदः पिक-काकयोः।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ।।1।।

सन्दिग्धे परलोकेऽपि कर्तव्यो धर्मसञ्चयः।
नास्ति चेन्नास्ति नो हानिः अस्ति चेन्नास्तिको हतः।।2।।

आगच्छति यदा लक्ष्मीः नारिकेलफलाम्बुवत्।
निर्गच्छति यदा लक्ष्मीः गजभुक्तकपित्थवत्।।3।।

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।
सहैव दशभिः पुत्रैः भारं वहति गर्दभी।।4।।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।।5।।

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति।।6।।

शब्दार्थाः

पिकः = कोयल। प्राप्ते = आने पर। सन्दिग्धे = सन्देह युक्त होने पर। धर्मसञ्चयः = धर्म का संग्रह। नो (नः) = हम लोगों की। नारिकेलफलाम्बुवत् = नारियल फल के जल के समान। गजभुक्तम् = हाथी द्वारा खाये हुए। कपित्थवत् = कैंथ नामक फल की भाँति। भारः = बोझ। आदानस्य = लेने की। क्षिप्रम् = शीघ्र। अक्रियमाणस्य = न किये जाने वाले। तद्रसम् = उसके रस या स्वाद को, उसके महत्त्व को। वज्रादपि = वज्र से भी। (वज्र = इन्द्र का

अस्त्र)। मृदूनि = कोमल। कुसुमादपि = फूल से भी। लोकोत्तराणाम् = सामान्य जनों से ऊपर उठे हुए। चेतांसि = मन को। को नु = कौन है जो। विज्ञातुम् अर्हति = जान सकता है।

अभ्यासः

1 उच्चारणं कुरुत -

क्षिप्रम् चेन्नास्ति अक्रियमाणस्य चेन्नास्तिकः गजभुक्तकपित्थवत् लोकोत्तराणाम्

2 एकपदेन उत्तरत -

(क) काकस्य कीदृशः वर्णः भवति ?

(ख) परलोके सन्दिग्धेऽपि किं कत्र्तव्यम् ?

(ग) नारिकेलफलाम्बुवत् का आगच्छति ?

(घ) एकेनापि सुपुत्रेण निर्भयं का स्वपिति ?

3 एकवाक्येन उत्तरत -

(क) कस्मिन् समये काकपिकयोः भेदः स्पष्टः भवति ?

(ख) लोकोत्तराणां चेतांसि कीदृशानि भवन्ति ?

(ग) कस्य कर्मणः रसं कालः पिबति ?

4 श्लोकांशान् योजयत -

'क' 'ख'

वसन्तसमये प्राप्ते गजभुक्तकपित्थवत्।

निर्गच्छति यदा लक्ष्मीः भारं वहति गर्दभी।

सहैव दशभिः पुत्रैः को नु विज्ञातुमर्हति।

लोकोत्तराणां चेतांसि काकः काकः, पिकः पिकः।

5 उपयुक्तकथनानां समक्षम् 'आम्' इति अनुपयुक्तकथनानां समक्षम् 'न' इति लिखत-

(क) सन्दिग्धे परलोकेऽपि कत्र्तव्यो धर्मसञ्चयः।

(ख) नारिकेलफलाम्बुवद् लक्ष्मीः आगच्छति।

(ग) कुसुमादपि मृदूनि लोकोत्तराणां चेतांसि न भवन्ति।

(घ) सहैव दशभिः पुत्रैः गर्दभी स्वपिति निर्भयम्।

6 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) समय आने पर शत्रु और मित्र की परीक्षा होती है।

(ख) सबके साथ मित्रवत् व्यवहार करना चाहिए।

(ग) कत्र्तव्य में प्रमाद नहीं करना चाहिए।

(घ) महापुरुषों का हृदय कोमल होता है।

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) नास्ति चेन्नास्ति नो हानिः अस्ति चेन्नास्तिको हतः।

(ख) एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।

(ग) लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति।
(घ) सहैव दशभिः पुत्रैः भारं वहति गर्दभी।
8 मञ्जूषातः अव्यय-पदानि चित्वा रिक्तस्थानानि पूरयत-
अपि यदा सहैव
(क) निर्गच्छति .... लक्ष्मीः गजभुक्तकपित्थवत्।
(ख) एकेन .... सुपुत्रेण सिंही स्वपिति निर्भयम्।
(ग) .... दशभिः पुत्रैः भारं वहति गर्दभी।
नास्त्युद्यमसमो बन्धुः।

षष्ठः पाठः किं तर्तुं जानाति भवान्

(तुमुन्-क्त-प्रत्ययौ विधिलिङ्लकारश्च)

विश्वविद्यालयस्य कश्चित् प्राध्यापकः विहर्तुं नावम् आरूढः। नावा जलविहारं कर्तुं तस्य प्रथमोऽयमवसरः आसीत्। बालसूर्यस्य किरणानां जलक्रीडाम्, वीचीनां नर्तनम्, अम्भसाम् अपारराशिम्, अरित्रमाध्यमेन नौकायाः अग्रेसारणम् इत्यादि दृश्यं दृष्ट्वा सः नाविकम् एवम् अपृच्छत्-

प्राध्यापकः - भो नाविक ! किं भवता कदापि गणितं पठितम् ?

नाविकः - न पठितम्।

प्राध्यापकः - किं गणितं पठितुं विद्यालयं न गतवान्। नूनं भवतः जीवनस्य चतुर्थांशः व्यर्थतां गतः। भवता रसायनशास्त्रं भौतिकशास्त्रं वा पठितं स्यात्।

नाविकः - ईदृशं मे भाग्यं कुतः ? यदहं भौतिक-शास्त्रं रसायनशास्त्रं वा पठेयम्।

प्राध्यापकः - नूनं त्वया अर्धांशः जीवनस्य व्यर्थतां नीतः। वद वद त्वया आंग्लभाषा तु पठिता स्यादेव?

नाविकः - (ग्लानिम् अनुभवन्) महाशय! नाहं मात्रा पित्रा वा विद्यालयं प्रेषितः। कुतः पठेयम्?

प्राध्यापकः - तर्हि तव जीवनस्य त्रयो भागाः अपार्था जाताः। अत्रान्तरे नदे जलावर्तनं समायातम्। लहरीणां वेगेन तदा नौः अकम्पत। पश्यतोः एव तयोः नौका जलेन पूरिता जाता। नाविकः प्राध्यापकं सम्भ्रमेण अपृच्छत् - महाशय! किं भवान् तर्तुं जानाति?

प्राध्यापकः नौकां जलपूरितां दृष्ट्वा भीतोऽवदत् - अहं तर्तुं न जानामि। नाविकः अवोचत्- यदि तर्तुं न जानाति, तदा भवतः सर्वं जीवनं वृथा जातम्। अहं तु बाहुभ्यां नदं तीर्त्वा पारं प्रयामि। भवान् खलु जलमध्ये विहरतु।

शब्दार्थाः

विहर्तुम् = घूमने के लिए। नावम् = नाव पर। आरूढः = बैठ गया। जलविहारम् = जलविहार।

वीचीनाम् = तरङ्गों का। अम्भसाम् = जल की। अरित्रम् = पतवार, डाँड़। चतुर्थांशः = चैथाई भाग। व्यर्थतां गतः = व्यर्थ चला गया। ईदृशम् = ऐसा। मे = मेरा। कुतः = कहाँ से। नूनम् = निश्चय ही।

अर्धांशः = आधा हिस्सा। व्यर्थतां नीतः = व्यर्थ कर दिया। अनुभवन् = अनुभव करता हुआ।

प्रेषितः = भेजा गया। त्रयो भागाः = तीन भाग। अपार्थाः = व्यर्थ। नदे = नदी में।
जलावर्तनम् = भँवर। अकम्पत = डगमगाने लगा। पश्यतः = देखते-देखते। जलेन = जल से। पूरिता = भर गयी।
सम्भ्रमेण = घबराहट के साथ। तर्तुम् = तैरने के लिए। भीतः = डरा हुआ। तीर्त्वा = तैरकर।
प्रयामि = जाता हूँ। खलु = निश्चय ही। विहरतु = विहार करें।

अभ्यासः

1 उच्चारणं कुरुत -
आरूढः जलावर्तनम् चतुर्थांशः
व्यर्थताम् तीर्त्वा अरित्रमाध्यमेन

2 एकपदेन उत्तरत -
(क) कः विहर्तुं नावम् आरूढः ?
(ख) नौकायाः अग्रेसारणं केन माध्यमेन भवति ?
(ग) कः ग्लानिम् अन्वभवत् ?
(घ) जलेन पूरिता का जाता ?

3 कः कथयति इति लिखत - नाविकः / प्राध्यापकः
(क) भवता कदापि गणितं पठितम् ? (ख) ईदृशं मे भाग्यं कुतः ?
(ग) त्वया अर्धांशः जीवनस्य व्यर्थतां नीतः
(घ) अहं तर्तुं न जानामि।
(ङ) यदि तर्तुं न जानाति, तदा भवतः सर्वं जीवनं वृथा जातम्।

4 अधोलिखितधातुभिः तुमुन्-प्रत्ययं योजयित्वा पदरचनां कुरुत -
यथा-खाद् + तुमुन् = खादितुम्।
चल् + तुमुन् =..........................
हस् + तुमुन् =..........................
क्रीड् + तुमुन् =..........................
पठ् + तुमुन् =..........................

5 अधोलिखितधातुभिः ‘त्वा’ (क्त्वा) प्रत्ययं योजयित्वा पदरचनां कुरुत -
यथा- पठ् + त्वा = पठित्वा।
नी + त्वा =..........................
गम् + त्वा =..........................
लिख् + त्वा =..........................

6 हिन्दीभाषायाम् अनुवादं कुरुत -
(क) किं त्वया संस्कृत-भाषा पठिता ?
(ख) जीवनस्य त्रयो भागाः अपार्थाः।

(ग) प्राध्यापकः नावम् आरुढः।
(घ) भवान् खलु जलमध्ये विहरतु।
7 संस्कृतभाषायाम् अनुवादं कुरुत -
(क) वह पढ़ने के लिए आता है।
(ख) क्या तुम सब तैरना जानते हो ?
(ग) क्या तुम प्रतिदिन खेलते हो ?
(घ) हम दोनों घूमने के लिए नदी के किनारे जाते हैं।
शिक्षण-सङ्केतः
1. पाठस्य कथानकं छात्रैः लघुसमूहेषु समयं निश्चितं कृत्वा लेखयत।
2. कर्मवाच्ये कर्मणः लिङ्गानुसारं कृदन्त-क्रियापदानां लिङ्गस्य परिवर्तनं बोधयत।
सहसा विदधीत न क्रियाम्।

सप्तमः पाठः सुभाषितानि

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।1।।
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयो।।2।।
वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम्।
वृथा दानं समर्थस्य वृथा दीपो दिवापि च।।3।।
काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा।।4।।
विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्।।5।।
किं कुलेन विशालेन विद्याहीनस्य देहिनः।
विद्यावान् पूज्यते लोके नाविद्यः परिपूज्यते।।6।।
वेशेन वपुषा वाचा विद्यया विनयेन च।
वकारैः पञ्चभिर्युक्तो नरो भवति पूजितः।।7।।

शब्दार्थाः

निजः = अपना। परः = पराया, दूसरे का। लघुचेतसाम् = छोटे चित्तवालों का, अनुदार लोगों का।
वसुधैव = (वसुधा+एव) सम्पूर्ण पृथ्वी ही। कुटुम्बकम् = परिवार (है)। परवशम् = दूसरों के वश में होना। आत्मवशम् = अपने अधीन। समासेन = संक्षेप में । विद्यात् = जानना चाहिए। समर्थस्य = भरे-पूरे, सशक्त के लिए। दिवा = दिन में । धीमताम् = बुद्धिमानों का। व्यसनेन = बुरी आदतों के द्वारा। निद्रया = सोने से। कलहेन = लड़ाई-झगड़ा से। व्यसनेषु = कष्टों में । मतिः = बुद्धि। देहिनः = जीव का। अविद्यः = विद्याहीन। वपुषा = शरीर से।

अभ्यासः

1 उच्चारणं कुरुत -
दुःखम् मूर्खाणाम् सुखदुःखयोः
वृष्टिः काव्यशास्त्रविनोदेन पञ्चभिर्युक्तः
2 एकपदेन उत्तरत -
(क) उदारचरितानां कृते सम्पूर्णा वसुधा किम् अस्ति ?
(ख) सर्वत्र किं धनम् अस्ति ?
(ग) समुद्रेषु वृष्टिः कीदृशी भवति ?

(घ) विद्वान् कुत्र पूज्यते ?

3 प्रश्नानामुत्तराणि लिखत -

(क) सुखदु:खयो किं लक्षणम् अस्ति ?

(ख) पञ्चवकाराः के सन्ति ?

(ग) धीमतां कालः कथं गच्छति ?

(घ) दीपः वृथा कदा भवति ?

4 लघुचक्र मध्ये चत्वारि क्रियापदानि सन्ति। तानि द्विधा दीर्घचक्रस्थवाक्यांशैः प्रयुज्य सार्थकवाक्यानि रचयत-

....

....

....

....

....

....

5 मञ्जूषातः-पदानि चित्वा रिक्तस्थानानि पूरयत-

वृथा तु सर्वत्र गच्छति ।

(क) उदारचरितानाम् .... वसुधैव कुटुम्बकम्।

(ख) .... वृष्टिः समुद्रेषु।

(ग) शीलं .... वै धनम्।

(घ) मूर्खाणां समयः व्यसनेन निद्रया कलहेन ....।

6 विलोमपदानि योजयत -

निजः निर्बलः।
सबलः दुःखम्।
उदारः परः।
सुखम् अनुदारः।
7 हिन्दीभाषायाम् अनुवादं कुरुत -
(क) सर्वं परवशं दुःखम् सर्वमात्मवशं सुखम्।
(ख) वृथा तृप्तस्य भोजनम्।
(ग) व्यसनेषु धनं मतिः।
(घ) विद्यावान् पूज्यते लोके नाविद्यः परिपूज्यते।
ध्यातव्यम् - अस्मिन् पाठे वा, च, अपि इति, तु, एव, वृथा सर्वत्र, वै, खलु अव्ययपदानि आगतानि सन्ति। एषां त्रिषु लिङ्गेषु त्रिषु वचनेषु सर्वासु विभक्तिषु च एकमेव रूपं भवति, अर्थात् रूप परिवर्तनं न भवति। अत एव अव्ययपदेन उच्यन्ते।
शरीरमाद्यं खलु धर्मसाधनम्।

अष्टमः पाठः ग्राम्यजीवनम्



ग्राम्यजीवनं सुव्यवस्थितं भवति। ग्रामे प्रायेण सर्वे स्वस्थाः भवन्ति। वनेषु नगरेषु च तथा जीवनं न भवति। वस्तुतः ग्रामाः वननगरयोः मध्ये सन्ति। ग्रामीणाः जनाः प्रायेण कृषीवलाः भवन्ति। ते च प्रातःकालात् सायं यावत् क्षेत्रेषु कर्म कुर्वन्ति। क्षेत्राणि सेक्तुं वारिणा पूर्णाः कुल्याः भवन्ति। कृषकाः क्षेत्राणि हलेन कर्षन्ति। कुल्याजलेन तानि सिञ्चन्ति, तत्र बीजानि वपन्ति च।
ग्रामान् परितः शस्यश्यामला धरित्री राजते। परिश्रमशीलाः ग्रामीणाः धान्यादिकम् उत्पादयन्ति। वैज्ञानिकोपकरणानां साहाय्येन इदानीं कृषिव्यवसायः लाभप्रदः सञ्जातः।

ग्रामपथिकानां गोपालानां च संगीतेन हृदयं प्रसन्नं भवति। वृक्षाः निःस्वार्थमेव फलं छायां च प्रयच्छन्ति। ग्रामे शुक-कपोत - मयूर - कोकिलादयः पक्षिणः कूजन्ति। अश्व-गो-महिष-मेषादयः पशवः च चरन्ति। ग्रामेषु मनोरञ्जनम् अल्पव्ययसाध्यं भवति। धूलिधूसरिताः बालकाः विविधां क्रीडां कुर्वन्ति। जीवनरक्षणार्थम् अत्यन्तमुपयोगिनः वायुजलादिकाः ग्रामेषु प्रचुरं यथा लभ्यन्ते तथा न नगरेषु।

ग्राम्य-जीवनं सदाचारसम्पन्नं धार्मिकं च भवति। ग्रामवासिनां मनांसि निर्मलानि भवन्ति। तत्रत्यं वातावरणं स्वच्छं भवति। प्राचीनकाले ग्रामेषु तथाविधं शिक्षालय-चिकित्सालयादीनां सौविध्यं नासीत् यथा अद्यास्ति, तथापि अधुना ग्रामेषु सकलानि साधनानि यदि उपलब्धानि भवेयुः तर्हि ग्राम्यजीवनम् इतोऽपि सुकरं सुखकरं च भविष्यति। तदर्थं ग्राम-निवासिभिः सम्भूय प्रयत्नः विधेयः।

शब्दार्थाः

कृषीवलाः = किसान। क्षेत्रेषु = खेतों में। वारिणा = जल से। कुल्या = नहर। कर्षन्ति = जोतते हैं। वपन्ति = बोते हैं। परितः = चारों ओर। प्रयच्छन्तः = प्रदान करते हुए। शस्यश्यामला = फसलों से हरित। कूजन्ति = कूजते हैं। सम्भूय = एक होकर। सौविध्यम् = सुविधा। सुकरम् = सरल।

राजते = सुशोभित होती है।

अभ्यासः

1 उच्चारणं कुरुत -

सुव्यवस्थितम् साहाय्येन अल्पव्ययसाध्यम्

निःस्वार्थमेव जीवनरक्षणार्थम् सौविध्यम्।

2 एकपदेन उत्तरत -

(क) कृषकाः क्षेत्राणि केन कर्षन्ति ?

(ख) निःस्वार्थमेव फलं छायाञ्च के प्रयच्छन्ति ?

(ग) ग्रामेषु अल्पव्ययसाध्यं किं भवति ?

(घ) ग्रामनिवासिभिः सम्भूय किं विधेयम् ?

3 पूर्णवाक्येन उत्तरत -

(क) ग्राम्यजीवनं कीदृशं भवति ?

(ख) क्षेत्रेषु जनाः कदा कार्यं कुर्वन्ति ?

(ग) प्राचीनकाले ग्रामेषु केषां सौविध्यं नासीत् ?

(घ) ग्राम्यजीवनं सुकरं कदा भविष्यति ?

4 मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत-

उत्पादयन्ति कर्षन्ति कूजन्ति भवति लभ्यन्ते

(क) ग्राम्यजीवनं सुव्यवस्थितम् ....।

(ख) कृषकाः क्षेत्राणि हलेन ....।

(ग) ग्रामे शुक-कपोत-मयूर-कोकिलादयः पक्षिणः.......................।

(घ) परिश्रमशीलाः ग्रामीणाः धान्यादिकम्.......................।

(ङ) वायुजलादिकाः ग्रामेषु प्रचुरं......................।

5 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) गाँव में लोग प्रायः स्वस्थ होते हैं। (ख) गाँव कृषिप्रधान होता है।

(ग) किसान खेत की जुताई करता है। (घ) किसान अन्न उपजाता है।

6 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) ग्राम्यजीवनं प्रायः सर्वत्र सुखकरं वर्तते।

(ख) सङ्गीतं कर्णप्रियं भवति।

(ग) कृषिव्यवसायः इदानीं लाभप्रदः जातः।

(घ) ग्रामवासिभिः प्रयत्नः विधेयः।

7 रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -

(क) ग्रामे प्रायेण सर्वे स्वस्थाः भवन्ति।

(ख) ग्रामं परितः शस्यश्यामला धरित्री राजते।

(ग) धिूलधूसरिताः बालकाः विविधां क्रीडां कुर्वन्ति।
(घ) ग्रामवासिनां मनांसि निर्मलानि भवन्ति।
8 शुद्धकथनस्य समक्षम् ‘आम्’ अशुद्धकथनस्य समक्षम् ‘न’ इति लिखत -
(क) ग्रामपथिकानां गोपालानां सङ्गीतेन हृदयं प्रसन्नं भवति। (ख) वैज्ञानिकोपकरणानां साहाय्येन कृषिव्यापारः हानिकरः सञ्जातः। (ग) ग्राम्यजीवनं सदाचार-सम्पन्नं धार्मिकञ्च भवति। (घ) विकासाय ग्रामवासिभिः सम्भूय प्रयत्नः न विधेयः।
शिक्षण-सङ्केतः
ग्राम्यजीवनस्य इतोऽपि सुखकरं सुकरं च निर्मातुं किं किं करणीयमिति लेखयत।
आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नवमः पाठः भव्या भागीरथी

हिमाद्रेः सम्भूता विहरसि तदङ्के हिममये,
ततो भूमिं याता विचरसि सुहासा समतले।
पुनासि त्वं लोकान् प्रवहसि समुद्रं प्रति सदा,
अहो दिव्ये गङ्गे! भवतु सुखदं नस्तव जलम्।।1।।
न जाने किं पुण्यं फलितमधुना नो भगवति,
प्रियो देशो जातः तव जलकणैर्नष्टकलुषः।
हरिद्वारं काशी तव तटमहत्त्वं कथयतः,
प्रयागस्तीर्थानां पतिरतुलनीयस्तव तटे ।।2।।
जनानां धात्री त्वं सुमधुर-फलान्नानि ददती,
विशालां सिञ्चन्ती मधुमयजलैर्भारतभुवम्।
अये शुभ्रे गङ्गे ! विलसिततरङ्गे ! त्रिपथगे!
तवोत्सङ्गे धन्याः शिशव इव खेलन्ति मनुजाः।।3।।



पयस्ते कुल्याभिर्व्रजति बहु दूरं सुमधुरम्,
ततः सिक्तं क्षेत्रं भवति हरितं चापि ललितम्।
गभीरे ते नीरे तरणिषु सुखं यान्ति पथिकाः,
वयं भूयो भूयो जगति तव कृत्यैरुपकृताः।।4।।
अये पुण्ये गङ्गे !जगति जननं चेन्मम पुनः,
भवेत् क्रीडाभूमिः पुनरपि शुभा भारतधरा।
सदा सेवे नीरं सुरनदि ! तवेदं सुखकरम्,
न मेऽन्या स्यादीहा तव तटविहारे विहरतः।।5।।

शब्दार्थाः

हिमाद्रेः = हिमालय पर्वत से । सम्भूता = निकली हुई। सुहासा = सुन्दर हँसती हुई। पुनासि = पवित्र करती हो। धात्री = धारण करने वाली। त्रिपथगे = तीन मार्गों से जाने वाली (स्वर्गलोक, पृथ्वीलोक तथा पाताललोक मे बहने वाली) गङ्गा। उत्सङ्गे = गोद में। कुल्याभिः = नहरों से। व्रजति = जाती है। तरणिषु = नौकाओं में। ईहा = इच्छा। यान्ति = जाते हैं। चेत् = यदि।

अभ्यासः

1 उच्चारणं कुरुत -

हिमाद्रेः तदङ्के जलकणैर्नष्टकलुषः फलान्नानि मधुमयजलैर्भारतभुवम् तवोत्सङ्गे
कुल्याभिव्रजति क्रीडाभूमिः कृत्यैरुपकृताः

2 एकपदेन उत्तरत -

(क) गङ्गा कुतः सम्भूता ?

(ख) तीर्थानां पतिः कः ?

(ग) गङ्गायाः पयः काभिः बहुदूरं व्रजति ?

(घ) गङ्गायाः गभीरे नीरे तरणिषु के सुखं यान्ति ?

(ङ) भागीरथी कान् पुनाति ?

3 पूर्णवाक्येन उत्तरत -

(क) गङ्गातटे कानि प्रसिद्धानि नगराणि स्थितानि ?

(ख) गङ्गा-जलात् सिक्तं क्षेत्रं कीदृशं भवति ?

(ग) गङ्गा कीदृशैः जलैः भारतभुवम् सिञ्चति ?

(घ) भागीरथ्याः उत्सङ्गे के शिशवः इव खेलन्ति ?

4 मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत -

कथयतः यान्ति व्रजति खेलन्ति

(क) हरिद्वारं काशी तव तट-महत्त्वं ....

(ख) शिशवः इव .... मनुजाः।

(ग) पयस्ते कुल्याभिः .... बहुदूरम् सुमधुरम्।

(घ) तरणिषु सुखम् .... पथिकाः।

5 अधोलिखित-पदेषु सन्धि-विच्छेदं कुरुत -

मेऽन्या = ... + ...

तवोत्सङ्गे = ... + ...

मधुमयजलैर्भारतभुवम् = ... + ...

तवेदम् = ... + ...

6 संस्कृतभाषायाम् अनुवादं कुरुत -

(क) गंगा सभी नदियों में श्रेष्ठ है।

(ख) इसका जल शीतल एवं पवित्र है।

(ग)पर्यटक गंगा में नौका विहार करते हैं।

(घ) गंगा-तट पर बैठकर लोग तप करते हैं।

(ङ) वाराणसी में गंगा का तट बहुत सुन्दर है।

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) हिममये अङ्के विहरसि। (ख) त्वं लोकान् पुनासि।

(ग) त्वं जनानां धात्री। (घ) त्वं विशालां भारतभुवं सिञ्चसि।

(ङ) मनुजाः तव उत्सङ्गे खेलन्ति।
8 रेखाङ्कित-पदानि आधृत्य प्रश्न-निर्माणं कुरुत -
(क) गङ्गा हिमाद्रेः सम्भूता।
(ख) गङ्गा लोकान् पुनाति ।
(ग) हरिद्वारं काशी तव तटमहत्त्वं कथयतः।
(घ) पयस्ते कुल्याभिः व्रजति।
9 अधोलिखित-पदान् समानार्थक-पदैः सह योजयत -
गङ्गा हिमगिरिः
हिमालयः जलधिः
समुद्रः वारि
जलम् जाह्नवी
शिक्षण-सङ्केतः
(1) गङ्गायाः उत्पत्तिस्तथा तस्याः धरायाम् अवतरणवृत्तान्तं छात्रान् बोधयत।
(2) गङ्गामाधारीकृत्य पञ्च संस्कृत-वाक्यान् लेखनाय प्रेरयत।

दशमः पाठः शतबुद्धि-सहस्रबुद्धि-कथा

(तत्, एतत्, कथ्, वद्)

कस्मिंश्चिद् जलाशये शतबुद्धिः सहस्रबुद्धिश्चेति द्वौ मत्स्यौ निवसतः स्म। तयोः एकबुद्धिनामकेन मण्डूकेन मित्रताऽभवत्। कदाचिज्जालहस्ताः धीवराः तं जलाशयमुपगताः। तेषु एको धीवरः अवदत्- एतस्मिन् जलाशये बहवो मत्स्याः सन्ति, अतः तान् ग्रहीतुं श्वोऽत्र जालं क्षेप्स्यामः। तच्छ्रुत्वा मत्स्याः दुःखिनः अभवन्। तेषु मण्डूकः प्राह - भोः शतबुद्धे! श्रुतं धीवरोक्तं भवता। ततः किं कर्तव्यम् ? पलायनम् अवष्टम्भो वा।
सहस्रबुद्धिः अवदत्- मित्र!मा भैषीः। केवलं वचनश्रवणादेव न भेतव्यम्।
सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम्।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत्।।
शतबुद्धिरपि अकथयत् साधु उक्तं त्वया। त्वं सहस्रबुद्धिः असि। तव सदृशी बुद्धिः कस्यापि नास्ति। वचनमात्रेण स्वजन्मस्थानं न त्याज्यम्।
अहं त्वां सुबुद्धिप्रभावेण रक्षयिष्यामि। मण्डूक आह-भोः! मम त्वेका एव बुद्धिः। अहं तु अत्र न स्थास्यामि। अन्यं जलाशयं गमिष्यामि। एवमुक्त्वा सः अन्यजलाशयं गतः। ततः प्रभाते धीवरैः आगत्य जालमध्ये मत्स्य-कूर्म-मण्डूक-कर्कटादयो निगृहीताः।
शतबुद्धिसहस्रबुद्धिमत्स्यौ अपि निगृहीतौ। अपराह्ने सुखं गच्छत्सु धीवरेषु एकस्य शिरसि आरोपितं शतबुद्धिम् अपरस्य हस्ते प्रलम्बमानं सहस्रबुधिं चालोक्य मण्डूकः स्वपत्नीमकथयत्-
शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः ।
एकबुद्धिरहं भद्रे ! क्रीडामि विमले जले ।। (पञ्चतन्त्रतः)

शब्दार्थाः

मत्स्यौ = दो मछलियाँ। मण्डूकेन = मेढक से। जालहस्ताः धीवराः = हाथ में जाल लिये हुए मछुआरे। उपगताः = पहुँचे। श्वः = आने वाला कल। क्षेप्स्यामः = फेकेंगे। पलायनम् = भागना। अवष्टम्भः = रुकना। मा भैषीः = मत डरो। न भेतव्यम् = नहीं डरना चाहिए। दुष्टचेतसाम् = दुष्ट हृदय वालों का। स्थास्यामि = रहूँगा। कूर्म-मण्डूक-कर्कटादयः = कछुवा,

मेढक, केकड़े आदि। निगृहीतौ = (दोनों मछलियाँ) पकड़ ली गयीं। प्रलम्बमानम् = लटकते हुए। सहस्रधीः = हजार बुद्धि वाला। शिरःस्थः = सिर पर स्थित। लम्बते = लटक रहा है।

अभ्यासः

1 उच्चारणं कुरुत -

कस्मिंश्चिद् मत्स्यौ कदाचिज्जालहस्ताः तच्छ्रुत्वा अवष्टम्भः श्वोऽत्र

2 एकपदेन उत्तरत -

(क) शतबुद्धिः सहस्रबुद्धिश्च कुत्र निवसतः स्म ?

(ख) जालहस्ताः धीवराः कम् उपगताः ?

(ग) कस्य एका बुद्धिरासीत् ?

(घ) जलाशये बहवः के सन्ति ?

3 कः उक्तवान् इति लिखत- (मण्डूकः/शतबुद्धिः/सहस्रबुद्धिः/धीवरः)

(क) एतस्मिन् जलाशये बहवः मत्स्याः सन्ति। .... (ख) केवलं वचन-श्रवणादेव न भेतव्यम्। ....

(ग) त्वं सहस्रबुद्धिः असि। ....

(घ) भोः! मम तु एका एव बुद्धिः। .... 4 मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत -

क्षेप्स्यामः नास्ति रक्षयिष्यामि निवसतःस्म अवदत्

(क) द्वौ मत्स्यौ ....

(ख) एको धीवरः ....

(ग) श्वोऽत्र जालं ....

(घ) तव सदृशी बुद्धिः कस्यापि ....

(ङ) अहं त्वां सुबुद्धिप्रभावेण ....

5 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) तच्छ्रुत्वा मत्स्याः दुःखिनोऽभवन्।

(ख) अहं त्वां सुबुद्धिप्रभावेण रक्षयिष्यामि।

(ग) अहं तु अत्र न स्थास्यामि।

(घ) मण्डूकः स्वपत्नीम् अकथयत्।

6 समासविग्रहं कृत्वा समासस्य नाम लिखत -

सामासिकपदम् समासविग्रहः समास-नाम

जलाशयः = जलस्य आशयः तत्पुरुषः।

जालमध्ये = ...।

स्वपत्नीम् = ...।

जन्मस्थानम् = ...।

मत्स्यकूर्ममण्डूकाः = ...।
7 निम्नलिखित-पदानां विभक्त्ंि वचनं च लिखत -
पदम् विभक्तिः वचनम्
भवता = तृतीया एकवचनम्।
त्वया = ...।
तान् = ...।
धीवराः = ...।
सर्पाणाम् = ...।
शिक्षण-सङ्केतः
प्रस्तुतकथां संक्षेपेण छात्रैः स्वशब्देषु लेखयत।
एतदपि जानीत-
वाहनों का संस्कृत में नाम-
सवारी यानम्
गाड़ी शकटः, शकटी
साइकिल द्विचक्रिका
बैलगाड़ी गन्त्री
हवाई जहाज वायुयानम्/विमानम्
जहाज पोतः, जलयानम्

एकादशः पाठः रामवनगमनम्

(तव्यत्-प्रत्ययः)

काञ्चुकीयः - (प्रविश्य) परित्रायताम्, परित्रायताम् कुमार!
रामः - आर्य! कः परित्रातव्यः ?
काञ्चुकीयः - महाराजः।
रामः - कस्मात् ?
काञ्चुकीयः - स्वजनात्। तत्र भवत्याः कैकेय्याः।
रामः - किमम्बायाः ? तया हि उदर्केण गुणेनात्र भवितव्यम्। श्रूयताम्-

यस्याः शक्रसमो भर्ता मया पुत्रवती च या।
फले कस्मिन् स्पृहा तस्याः येनाकार्यं करिष्यति।।

काञ्चुकीयः - कुमार! तस्या एव खलु वचनाद् भवदभिषेको निवृत्तः। अथ च तया भरतोऽभिषिच्यतां राज्यम् इत्युक्तम्। अत्राप्यलोभः ?
रामः - आर्य! भवान् खलु अस्मत्पक्षपातादेव नार्थमवेक्षते।अतः परं न मातुः परिवादं श्रोतुमिच्छामि। महाराजस्य वृत्तान्तस्तावद् अभिधीयताम्।
काञ्चुकीयः - ततस्तदानीम्,

शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः।
किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः।।

रामः - कथं मोहमुपगतः! हन्त! निवेदितमप्रभुत्वम्। मैथिलि! मङ्गलार्थे वल्कलान् तावद् आनय।
मया किल वनं गन्तव्यम्। मैथिलि! किं व्यवसितं त्वया ?
सीता - ननु सहधर्मचारिणी अहम्। अतो नु खलु अनुगच्छामि।
रामः - वने खलु वस्तव्यम्।
सीता - तत् खलु मे प्रसादः।
रामः - लक्ष्मण! वारयतु अत्रभवतीं वनगमनात्।
लक्ष्मणः - आर्य! नोत्सहे श्लाघनीये काले वारयितुमत्रभवतीम्। प्रसीदत्वार्य! वस्त्रादेः भूषणाद् माल्यात् सर्वेभ्यः मे अर्धं प्रदाय एकाकिनी वल्कलविषये कथं स्वार्थः सञ्जातः ?
रामः - मैथिलि! वार्यतामयम्।
सीता - सौमित्रे! निवत्र्यतां किल।

लक्ष्मणः - त्वम् एकाकिनी मे रामस्य शुश्रूषां कर्तुम् इच्छसि। दक्षिणः पादः तवैव, मम तु वामः पादो भविष्यति।
सीता - दीयतां खलु अनुज्ञा आर्यपुत्र! सन्तप्यते सौमित्रिः।
रामः - सौमित्रे! श्रूयताम्। वल्कलानि नाम -
तपःसंग्रामकवचं नियमद्विरदाङ्कुशः।
खलीनमिन्द्रियाश्वानां गृह्यतां धर्मसारथिः।
(इति वल्कलं ददाति)
लक्ष्मणः - अनुगृहीतोऽस्मि। (गृहीत्वा परिधत्ते)
रामः - श्रुतवृत्तान्तैः पौरैः सन्निरुद्धो राजमार्गः।
उत्सार्यताम् उत्सार्यताम् तावत्।
लक्ष्मणः - आर्य! अहमग्रतो यास्यामि।
उत्सार्यताम् उत्सार्यताम्।
रामः - मैथिलि! अपनीयतामवगुण्ठनम्।
सीता - यदार्यपुत्रः आज्ञापयति।
रामः - शृण्वन्तु शृण्वन्तु भवन्तः-
स्वैरं हि पश्यन्तु कलत्रमेतद् वाष्पाकुलाक्षैर्वदनैर्भवन्तः।
निर्दोषदृश्या हि भवन्ति नार्यो यज्ञे विवाहे व्यसने वने च।।
गतेष्वस्मासु राजा नः शिरःस्थानानि पश्यतु।
(इति निष्क्रान्ताः सर्वे)

शब्दार्थाः

काञ्चुकीयः = राजा के अन्तःपुर का सेवक। परित्रायताम् = रक्षा करें। परित्रातव्यः = रक्षा करने योग्य। स्वजनात् = अपने लोगों से। उदर्केण = उन्नत। शक्रसमः = इन्द्र के समान। स्पृहा = कामना। अकार्यम् = निन्दित कार्य। भवदभिषेकः = आप का राज्याभिषेक। निवृत्तः= रुक गया। परिवादम् = निन्दा को। नार्थमवेक्षते = वास्तविकता को नहीं देखते। व्यवसितम् = निश्चय किया। अनुगच्छामि = अनुगमन करती हूँ। वारयितुम् = रोकने के लिए। तपःसङ्ग्रामकवचम् = तपरूप संग्राम में कवच। नियमद्विरदाङ्कुशः = संयम रूपी हाथी के वशीकरण में अङ्कुश। खलीनम् = लगाम। गृह्यताम् = ग्रहण कीजिए, समझिए। उत्सार्यताम् = हटाया जाय। अवगुण्ठनम् = घूँघट। कलत्रम् = पत्नी। व्यसने= संकट या विपत्ति में।

अभ्यासः

1 उच्चारणं कुरुत -
काञ्चुकीयः परित्रायताम् कैकेय्याः
भरतोऽभिषिच्यताम् किमप्यभिमतम् प्रसीदत्वार्य नियमद्विरदाङ्कुशः

2 एकपदेन उत्तरत -
(क) कस्याः शक्रसमो भर्ता ?
(ख) कः मोहं गतः ?
(ग) कैः सन्निरुद्धः राजमार्गः ?
(घ) रामस्य सहधर्मचारिणी का ?
(ङ) अपनीयताम् अवगुण्ठनमिति कः उक्तवान् ?
3 एकवाक्येन उत्तरत -
(क) राज्ञा कस्मात् कारणात् हस्तेनैव विसर्जितः ?
(ख) लक्ष्मणः कां वारयितुं नोत्सहते ?
(ग) तपःसंग्रामकवचं किम् अस्ति ?
(घ) नार्यः कदा कदा निर्दोषदृश्याः भवन्ति ?
4 संस्कृतभाषायाम् अनुवादं कुरुत -
(क) मैं अकेला ही वन में जाऊँगा।
(ख) मैं अच्छा कार्य करना चाहता हूँ।
(ग) सीता श्रीराम की धर्मपत्नी थीं।
(घ) किस कारण वह दुःखी हो रहा है।
5 हिन्दीभाषायाम् अनुवादं कुरुत -
(क) यस्याः शक्रसमो भर्ता मया पुत्रवती च या।
(ख) फले कस्मिन् स्पृहा तस्याः येनाकार्यं करिष्यति।
(ग) महाराजस्य वृत्तान्तस्तावद् अभिधीयताम्।
(घ) त्वं एकाकिनी एव शुश्रूषां कर्त्तुमिच्छसि।
(ङ) नार्यः निर्दोषदृश्याः भवन्ति।
6 अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -
(क) रामः मातुः परिवादं न श्रोतुमिच्छति।
(ख) मङ्गलार्थे वल्कलान् आनय।
(ग) सः मातुः शुश्रूषां कर्तुमिच्छति।
(घ) अपनीयताम् अवगुण्ठनम्।
7 अधोलिखितपदेषु सन्धिं कृत्वा सन्धिनाम लिखत -
पदम् सन्धिः नाम
इति+उक्तम् = इत्युक्तम् यण्-सन्धिः।
हस्तेन+एव = ...
प्रसीदतु+आर्य = ...
महा+ऋषिः = ...

तथा+एव = ...
8 धातुभिः सह प्रत्ययं योजयित्वा वाक्यप्रयोगं कुरुत -
धातुः+प्रत्ययः पदम् वाक्यप्रयोगः
यथा- गम्+तव्यत् = गन्तव्यम् त्वया गन्तव्यम्।
दृश्+तव्यत् = ...
पठ्+तव्यत् = ...
भू+तव्यत् = ...
कृ+तव्यत् = ...
9 निम्नांकित-क्रियापदेषु-धातु-लकार-पुरुष-वचनानि लिखत -
क्रियापदम् धातुः लकारः पुरुषः वचनम्
यथा-करोतु = कृ लोट्लकारः प्रथमपुरुषः एकवचनम्
भविष्यति = ...
ददाति = ...
गच्छामि = ...
पश्यतु = ...
शिक्षण-सङ्केतः
रामवनगमनस्य कथां संक्षेपेण श्रावयत।
एतदपि जानीत-
कुछ लेखन सामग्री का संस्कृत नाम-
कागज कर्गदः, पत्रम्
कलम, पेन लेखनी, कलमः
फौन्टेन पेन मसिलेखनी/धारालेखनी
स्याही मसि
पेन्सिल तूलिका

द्वादशः पाठः प्रियं भारतम्

प्रकृत्या सुरम्यं विशालं प्रकामम्,
सरित्तारहारैः ललामं निकामम्।
हिमाद्रिर्ललाटे, पदे चैव सिन्धुः,
प्रियं भारतं सर्वथा दर्शनीयम्।।1।।
धनानां निधानं धरायां प्रधानम्,
इदं भारतं देवलोकेन तुल्यम्।
यशो यस्य शुभ्रं विदेशेषु गीतम्,
प्रियं भारतं तत् सदा पूजनीयम्।।2।।

अनेके प्रदेशाः अनेके च वेषाः,
अनेकानि रूपाणि भाषा अनेकाः।
परं यत्र सर्वे वयं भारतीयाः,
प्रियं भारतं तत् सदा रक्षणीयम्।।3।।
वयं भारतीयाः स्वदेशं नमामः,
परं धर्ममेकं सदा मानयामः।
तदर्थं धनं जीवनं चार्पयामः,
प्रियं भारतं मे सदा वन्दनीयम्।।4।।

शब्दार्थाः

सुरम्यम् = सुन्दर, रमणीय। प्रकामम् = अत्यन्त ललामम् = सुन्दर। निकामम् = अत्यधिक। सरित्तारहारैः = नदी रूपी उज्ज्वल हारों से। हिमाद्रि= हिमालय - हिम का अद्रि (पर्वत)। ललाटे = भाल पर। पदे = पद तल में। सिन्धुः = समुद्र। सर्वथा = हर तरह से। दर्शनीयम् = देखने योग्य। निधानम् = भाण्डार। धरायाम् = पृथ्वी पर। शुभ्रम् = उज्ज्वल। अनेके = बहुत से । नमामः = (हम) प्रणाम करते हंै। तदर्थम् = उसके लिए।

अभ्यासः

1 उच्चारणं कुरुत -

प्रकृत्या सरित्तारहारैः हिमाद्रिर्ललाटे
शुभ्रम् रक्षणीयम् चार्पयामः

2 एकपदेन उत्तरत -

(क) भारतस्य ललाटे किमस्ति ?

(ख) कस्य शुभ्रं यशः विदेशेषु गीतम् अस्ति ?
(ग) भारते कियन्तः वेषाः सन्ति ?
(घ) वयं भारतीयाः कं नमामः ?
3 पूर्णवाक्येन उत्तरत -
(क) भारते कियन्तः प्रदेशाः कियत्यश्च भाषाः सन्ति ?
(ख) इदं भारतं कस्य निधानं केन च तुल्यम् ?
(ग) वयं भारतीयाः किं किम् अर्पयामः ?
(घ) वयं सदा कं धर्मं मानयामः ?
4 संस्कृते अनुवादं कुरुत -
(क) प्रिय भारत सर्वथा दर्शनीय है।
(ख) भारत देवलोक के समान है।
(ग) इसमें बहुत से प्रदेश हंै।
(घ) हम भारतीय अपने देश को प्रणाम करते हैं।
5 हिन्दीभाषायाम् अनुवादं कुरुत -
(क) भारतस्य ललाटे हिमालयः अस्ति।
(ख) भारतमातुः पदे समुद्रम् अस्ति।
(ग) भारतमातुः शुभ्रं यशः विदेशेषु गीतम् अस्ति।
(घ) प्रियं भारतं सदा रक्षणीयम्।
6 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-
अर्पयामः देवलोकेन स्वदेशम् अनेकाः सर्वथा
(क) प्रियं भारतं .... दर्शनीयम्।
(ख) इदं भारतं .... तुल्यम्।
(ग) अनेकानि रूपाणि, भाषा .... ।
(घ) वयं भारतीयाः .... नमामः।
(ङ) तदर्थं धनं जीवनं च ....।
7 विशेष्यैः सह यथायोग्यं विशेषणानि योजयत -
विशेष्यम् विशेषणम्
भारतम् अनेकाः
यशः अनेके
भाषाः प्रियम्
प्रदेशाः शुभ्रम्
8 अनीयर् (अनीय) प्रत्ययं योजयित्वा पदानि लिखत -
धातुः प्रत्ययः पदम्

यथा- दृश् + अनीयर् = दर्शनीयम्
पूज् + अनीयर् = ...
पठ् + अनीयर् = ...
वन्द् + अनीयर् = ...
कथ् + अनीयर् = ...
शिक्षण-सङ्केतः सर्वेषां श्लोकानां सस्वर-गानं कारयत।
एतदपि जानीत- कुछ माप (तौल) का संस्कृत नाम-
पाव = कुडवः
सेर = सेरः, प्रस्थः
पैसा = पणः

त्रयोदशः पाठः वीरोऽभिमन्युः

(ल्यप्-प्रत्ययः)



महाभारतस्य युद्धम् अष्टादश दिनानि यावत् प्राचलत्। आदौ कौरवपक्षे पितामहः भीष्मः सेनापतिः अभवत्। दश दिनानि स युद्धम् अकरोत्। ततः एकादशे दिवसे द्रोणाचार्यः सेनापतिः अभवत्। स पञ्च दिनानि सेनापतिः आसीत्। पञ्चदशे दिवसे सः वीरगतिं प्राप्तवान्। तदनन्तरं कर्णः दिनद्वयपर्यन्तं सेनापतिः अभवत्। तस्मिन् वीरगतिं प्राप्ते अर्धं दिनं मातुलः शल्यः युद्धं कृतवान्। शेषे दिवसार्धे भीमदुर्योधनयोः गदायुद्धम् अभवत्।

अस्य ऐतिहासिकस्य महायुद्धस्य त्रयोदशे दिने यदा द्रोणाचार्यः कौरवपक्षस्य सेनापतिः आसीत्, तदा दुर्योधनः स्वविजयाय द्रोणाचार्यम् अतितरां प्रार्थितवान्। द्रोणाचार्यः अकथयत्- 'यदि अर्जुनः युद्धे कदाचित् सन्निहितः न भवेत्, तदा नूनं तव जयो भवेत्' इति श्रुत्वा दुर्योधनपक्षीयाः संशप्तकनामकाः वीरवराः अर्जुनं युद्धाय आहूय अन्यत्र दूरं नीतवन्तः। 'अयमेव अवसरः' इति मत्वा द्रोणाचार्यः चक्रव्यूहं रचितवान्,यस्य भेदनं पाण्डवपक्षे कोऽपि अर्जुनादन्यः न अजानात्।

महाराजो युधिष्ठिरः अत्यन्तम् उद्विग्नोऽभवत्। तदानीम् अर्जुनपुत्रः अभिमन्युः युद्धक्षेत्रं प्रति प्रस्थितः, यतः सः चक्रव्यूहभेदनविधिम् अजानात्। किन्तु चक्रव्यूहद्वारे स्वपितृष्वसुः पतिः सिन्धुराजो जयद्रथः युधिष्ठर-भीम-सहदेव-नकुलान् अवरुद्धवान्। अभिमन्युः एकाकी चक्रव्यूहमध्ये प्रविश्य अतीव पराक्रमेण युद्धं कृत्वा बहून् वीरान् हतवान्। हा धिक्! हा धिक् ! अन्ते द्रोणः, कृपः, कर्णः, अश्वत्थामा, बृहद्बलः, कृतवर्मा जयद्रथश्च सप्त योद्धारः सम्मिल्य अभिमन्युं निःशस्त्रं कृत्वा एकाकिनं तं हतवन्तः। अभिमन्युः वीरगतिं लब्ध्वा अमरोऽभवत्।

शब्दार्थाः

अष्टादश दिनानि यावत् = अठारह दिनों तक। पञ्चदशे दिवसे = पन्द्रहवें दिन। मातुलः = मामा। प्रार्थितवान् = प्रार्थना की। नीतवन्तः = ले गये। मत्वा = मानकर। अजानात् = जानते थे। तदानीम् = उस समय। पितृष्वसुः पतिः = पिता की बहन के पति (फूफा)। सम्मिल्य =मिलकर। निःशस्त्रम् = शस्त्ररहित

अभ्यासः

1 उच्चारणं कुरुत-

युद्धम् भीष्मः दिनद्वयपर्यन्तम्
भीमदुर्योधनयोः ऐतिहासिकस्य संशप्तकनामकाः
उद्विग्नोऽभवत् स्वपितृष्वसुः प्रविश्य
2 एकपदेन उत्तरत-
(क) कौरवपक्षे कः प्रथमं सेनापतिः अभवत् ?
(ख) द्रोणाचार्यः कति दिनानि सेनापतिः आसीत् ?
(ग) एकादशे दिवसे कः सेनापतिः अभवत् ?
(घ) अर्जुनं विहाय चक्रव्यूह-भेदन-विधिं कः अजानात्।
3 एकवाक्येन उत्तरत-
(क) महाभारतस्य युद्धं कति दिनानि यावत् प्राचलत्।
(ख) त्रयोदशे दिने कः सेनापतिः आसीत्।
(ग) द्रोणाचार्यः विजयाय किं रचितवान्।
(घ) चक्रव्यूहद्वारे पाण्डवान् कः अवरुद्धवान्।
4 अधोलिखित-पदानां विभक्ति-वचनं लिखत-
पदम् विभक्तिः वचनम्
यथा- मोहनम् द्वितीया एकवचन
ऐतिहासिकस्य ....
विजयाय ....
स्वपितृष्वसः ु ....
पराक्रमेण ....
5 अधोलिखितपदानि समानार्थकैः पदैः सह योजयत-
‘क’ ‘ख’
युद्धम् चमूपतिः
दिनानि दिवसाः
सेनापतिः एकलः
एकाकी मारितवान्
हतवान् समरः
6 अधोलिखितपदानि विलोमपदैः सह योजयत -
‘क’ ‘ख’
दिनम् आदौ
निःशस्त्रम् पराजयाय
विजयाय कापुरुषाः
वीराः सशस्त्रम्

अन्ते रात्रिः
7 अधोलिखितवाक्यानि संशोधयत -
(क) द्रोणाचार्यः सेनापतिः आसन्।
(ख) सः पञ्चदिनम् सेनापतिः आसीत्।
(ग) तौ वीरगतिं प्राप्तवान्।
(घ) दुर्योधनः स्वविजयः द्रोणाचार्यं प्रार्थितवान्।
(ङ) अभिमन्युः वीरगतौ लब्धवान्।
8 संस्कृतभाषायाम् अनुवादं कुरुत -
(क) वीर अभिमन्यु अर्जुन का पुत्र था।
(ख) वह अकेले सात महारथियों से लड़ा।
(ग) जयद्रथ ने अन्याय से अभिमन्यु का वध किया था।
(घ) अतः अर्जुन ने जयद्रथ के वध की प्रतिज्ञा की।
9 हिन्दीभाषायाम् अनुवादं कुरुत -
(क) शल्यः अर्धं दिनं युद्धम् अकरोत्।
(ख) सः चक्रव्यूहभेदनविधिम् अजानात्।
(ग) कौरवपक्षतः चक्रव्यूहस्य रचना अभवत्।
(घ) अभिमन्युः महान् योद्धा आसीत्।
(ङ) युद्धस्य परिणामः दुःखदायकः भवति।
शिक्षण-सङ्केतः
चक्रव्यूहभेदनप्रसङ्गं बालकान् संक्षेपेण श्रावयत।
ध्यातव्यम्
क्त-प्रत्ययः क्तवतु-प्रत्ययश्च भूतकालार्थे धातुभिः सह भवतः, अनयोः प्रयोगः लङ्लकारस्य स्थाने भवति, यथा-
पदम् धातुः प्रत्ययः वाक्यप्रयोगः
पतितः = पत् + क्त वानरः वृक्षात् पतितः। (अपतत्)
गतः = गम् + क्त रामः ग्रामं गतः। (अगच्छत्)
खादितवान् = खाद् + क्तवतु सः फलं खादितवान्। (अखादत्)
नीतवान् = नी + क्तवतु सः जलं नीतवान्। (अनयत्)
कृतवान् = कृ + क्तवतु सः कार्यं कृतवान्। (अकरोत्)
अनयोः रूपाणि च त्रिषु लिङ्गेषु भवन्ति।
यथा - पुंल्लिङ्गम् स्त्रीलिङ्गम् नपुंसकलिङ्गम्
पतितः पतिता पतितम्
कृतवान् कृतवती कृतवत्

चतुर्दशः पाठः वाराणसी नगरी

(नपुंसकलिङ्गं बहुवचनं च)

अस्माकं देशे बहूनि तीर्थस्थानानि सन्ति। तेषु वाराणसी अपि एकं प्रसिद्धं तीर्थस्थानम् अस्ति। इदं काशीनाम्नापि प्रसिद्धं वर्तते। एतत् पुण्यप्रदं प्राचीनतमं तीर्थस्थानं वर्तते। अनेकेषु प्राचीनग्रन्थेषु अस्य महिमा वर्णितः। स्कन्दपुराणस्य काशीखण्डे अस्याः वाराणस्याः विस्तरेण वर्णनं विहितम्।
इयं नगरी गङ्गायाः पवित्रे तटे विराजमाना अस्ति।
अत्रैव विश्वनाथस्य प्रसिद्धं सुवर्णचूडं मन्दिरम् अस्ति।
अन्यानि अपि बहूनि देवमन्दिराणि सन्ति यथा संकटमोचनमन्दिरम्, नवीनविश्वनाथमन्दिरम्, दुर्गामन्दिरम्, कालभैरवमन्दिरम्, तुलसीमानस-मन्दिरम् च।
वाराणस्यां गङ्गा उत्तरवाहिनी जाता, तस्याः तीरे अनेके मनोहराः घट्टाः सन्ति। अस्याः प्रसिद्धेषु घट्टेषु दशाश्वमेध-राजेन्द्रप्रसाद-तुलसी पञ्चगङ्गघट्टाः अन्यतमाः सन्ति, यत्र प्रातः सन्ध्याकाले च महान् जनसमुदायः आयाति। तत्र केचन स्नान्ति, केचन सन्ध्यावन्दनं कुर्वन्ति, केचित् कथां शृण्वन्ति, केचित् नौकासु विहरन्ति च।
अत्रैव एकं पिशाचमोचनं नामकं तीर्थमस्ति, यत्र यात्रिणः आगत्य पितृणां श्राद्धक्रियां कुर्वन्ति। शिवरात्रिदिने अत्र विशेषरूपेण मेला लगति। ग्रहणसमये अपि अत्र महान् जनसमुदायः एकत्र भवति। अत्र गङ्गायां स्नानाय श्रीविश्वनाथस्य दर्शनाय च सदैव भिन्न-भिन्न-प्रदेशेभ्यः जनाः आगच्छन्ति।
वाराणसी भारतस्य सुप्रसिद्धं पुरातनं विद्याकेन्द्रमपि अस्ति। अत्र प्राचीनकालात् पठनपाठनयोः परम्परा राजते। अत्र अनेके विख्याताः पण्डिताः जाताः। अद्यापि अत्रत्यानां पण्डितानां देशे विदेशे सर्वत्र प्रतिष्ठा भवति। विश्वविख्यातः काशीहिन्दूविश्वविद्यालयः अत्रैव विराजते। संस्कृत-शिक्षायाः प्रसिद्धं केन्द्रं सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः अस्याः एव शोभां वर्धयति। अत्रैव
महात्मागान्धी-काशी-विद्यापीठम् अस्ति।
अत्र अनेकानि पर्यटनस्थलानि सन्ति। विश्वप्रसिद्धं सारनाथस्थितं बौद्धमन्दिरम् इहैव अस्ति। यत्र भगवान् बुद्धः प्रथमं ज्ञानोपदेशं शिष्येभ्यः अददात्। अत्रैव ‘भारतमाता’ इति नामकं मन्दिरम् अपि अस्ति।
वाराणसी अस्माकं पवित्रं तीर्थस्थानम्, विद्यायाः विश्वविख्यातं केन्द्रम्, तुलसीदासस्य, कबीरदासस्य रविदासस्य च साधनाभूमिः तथा मुमुक्षूणां मुक्तिदायिनी नगरी अस्ति।

शब्दार्थाः

सुवर्णचूडम् = स्वर्णमण्डित शिखर वाला। पुरातनम् = प्राचीन। अत्रत्य = यहाँ के। अत्रैव = यहीं। विराजते = सुशोभित है। विस्तरेण= विस्तार से।

अभ्यासः

1 उच्चारणं कुरुत -

काशीनाम्नापि स्कन्दपुराणस्य सुवर्णचूडम्

मुमुक्षूणाम् शृण्वन्ति पञ्चगङ्गाघट्टः

2 एकवाक्येन उत्तरत -

(क) इयं नगरी कस्याः पवित्रतटे विराजमाना अस्ति ?

(ख) पित§णां श्राद्धक्रिया कुत्र भवति ?

(ग) भारतमाता-मन्दिरं कुत्र अस्ति ?

(घ) भगवान् बुद्धः शिष्येभ्यः प्रथमज्ञानोपदेशं कुत्र अददात् ?

3 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -

जनसमुदायः विद्याकेन्द्रमपि विश्वनाथस्य मनोहराः काशीखण्डे

(क) स्कन्दपुराणस्य .... अस्याः वाराणस्याः विस्तरेण वर्णनं वर्तते।

(ख) अत्रैव .... प्रसिद्धं सुवर्णचूडं मन्दिरम् अस्ति।

(ग) वाराणस्यां गङ्गायाः तीरे अनेके .... घट्टाः सन्ति।

(घ) ग्रहणसमये अपि अत्र महान् .... एकत्र भवति।

(ङ) वाराणसी भारतस्य सुप्रसिद्धं पुरातनं .... अस्ति।

4 अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत -

(क) फलानि

....

(ख) तीर्थस्थानानि

....

(ग) बहूनि

....

(घ) अनेकानि

....

(ङ) मन्दिराणि

....

5 भिन्नवर्गस्य पदं चिनुत- भिन्नवर्गः

यथा- मयूराः, चटकाः, लताः, शुकाः। लताः

(क) पुस्तकम्, कलमः, मित्रम्, चित्रम्। ....

(ख) जलचरः, भूचरः, खेचरः, निशाचरः। ....
(ग) शिक्षिका, अध्यापिका, उपदेशिका, पुस्तिका। ....
(घ) तीर्थस्थानानि, घट्टानि, मन्दिराणि, मनोहराणि। ....
6 रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -
(क) अत्रैव विश्वनाथस्य प्रसिद्धं सुवर्णचूडं मन्दिरम् अस्ति।
(ख) वाराणस्यां गङ्गा उत्तरवाहिनी जाता।
(ग) शिक्षायाः विश्वविख्यातं केन्दं्र हिन्दूविश्वविद्यालयः अस्ति।
(घ) भगवान् बुद्धः प्रथमं ज्ञानोपदेशं शिष्येभ्यः अददात्।
(ङ) वाराणसी अस्माकं पवित्रं तीर्थस्थानम् अस्ति।
7 उदाहरणानुसारं रूपाणि लिखत -
विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्
प्रथमा पयः पयसी पयांसि
यशः ....
द्वितीया फलम् फले फलानि
वनम् ....
तृतीया केन काभ्याम् कैः
तेन ....
चतुर्थी मधुने मधुभ्याम् मधुभ्यः
वस्तुने ....
पञ्चमी वारिणः वारिभ्याम् वारिभ्यः
अस्थिनः ....
षष्ठी मुखस्य मुखयोः मुखानाम्
तृणस्य ....
सप्तमी मित्रे मित्रयोः मित्रेषु
ज्ञाने ....
शिक्षण-सङ्केतः
(1) अस्मिन् पाठे वर्णितानां विश्वविद्यालयानां मन्दिराणां, प्रमुखघट्टानाञ्च विषये छात्रान् बोधयत।

पञ्चदशः पाठः गीतावचनामृतानि

त्वमादिदेवः पुरुषः पुराणः,
त्वमस्य विश्वस्य परं निधानम्।
वेत्तासि वेद्यं च परं च धाम,
त्वया ततं विश्वमनन्तरूप।।1।।
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।2।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।3।।
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि।।4।।
वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा -
न्यन्यानि संयाति नवानि देही।।5।।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।6।।
सुखदुःखे समे कृत्वा, लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।।7।।

शब्दार्थाः

परम् = सबसे बड़े। वेत्ता = जानकार। वेद्यम् = जानने योग्य। ततम् = फैलाया। ग्लानिः = हानि। अभ्युत्थानम् = बढ़ना, वृद्धि। आत्मानम् = अपने आपको। सृजामि = पैदा करता हूँ, प्रकट करता हूँ। परित्राणाय = रक्षा करने के लिए। दुष्कृताम् = पापियों के। संस्थापनार्थाय = स्थापना के लिए। सम्भवामि =उत्पन्न होता हूँ। कर्मणि = कर्म में। कदाचन = कभी। सङ्गः = आसक्ति। अकर्मणि = अकर्म में। वासांसि = कपड़े। जीर्णानि = पुराने। विहाय = त्यागकर, छोड़कर। अपराणि = दूसरे। संयाति = जाता है, प्रवेश करता है। देही = आत्मा (जो शरीर में रहे)। एनम् = इसको (आत्मा को)। छिन्दन्ति = काटते हंै। शस्त्राणि = हथियार। दहति = जलाता है। आपः = जल। क्लेदयन्ति = गीला करता है। शोषयति = सुखाता है। युज्यस्व = तैयार हो जाओ। अवाप्स्यसि = पाओगे, प्राप्त करोगे।

अन्वयः
1. हे अनन्तरूप! त्वं आदिदेवः, पुराणः पुरुषः (असि) त्वम् अस्य विश्वस्य परं निधानम् (असि) त्वं वेत्ता वेद्यं च (असि) त्वं परं धाम (असि) (हे अनन्तरूप!) त्वया विश्वं च ततम्।
2. हे भारत! यदा यदा हि धर्मस्य ग्लानिः (भवति) अधर्मस्य अभ्युत्थानं भवति तदा अहम् आत्मानं सृजामि।
3. (अहं) युगे युगे साधूनां परित्राणाय, दुष्कृतां विनाशाय, धर्मसंस्थापनार्थाय च सम्भवामि।
4. कर्मणि एव ते अधिकारः फलेषु कदाचन मा। त्वं कर्मफलहेतुः मा भूः। अकर्मणि ते सङ्गः अपि मा अस्तु।
5. यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि (वासांसि) गृह्णाति तथा देही जीर्णानि शरीराणि विहाय नवानि (शरीराणि) संयाति।
6. शस्त्राणि एनं न छिन्दन्ति, पावकः एनं न दहति। आपः एनं न क्लेदयन्ति, मारुतः एनं न शोषयति।
7. लाभालाभौ, जयाजयौ, सुखदुःखे समे कृत्वा ततः युद्धाय युज्यस्व । एवं पापं न अवाप्स्यसि।

अभ्यासः

1 उच्चारणं कुरुत -
पुरुषः वेत्तासि विश्वमनन्तरूप सङ्गोऽस्त्वकर्मणि
अभ्युत्थानमधर्मस्य सृजाम्यहम् धर्मसंस्थापनार्थाय कर्मफलहेतुर्भूः

2 एकपदेन उत्तरत -
(क) पुराणः पुरुषः कः ?
(ख) अस्माकं कुत्र अधिकारः अस्ति ?
(ग) केषां परित्राणाय ईश्वरः सम्भवति ?
(घ) शस्त्राणि कं न छिन्दन्ति ?

3 एकवाक्येन उत्तरत -
(क) परमात्मा आत्मानं कदा सृजति ?
(ख) कम् आपः न क्लेदयन्ति ?
(ग) जीर्णानि शरीराणि विहाय कः संयाति ?
(घ) पावकः कं न दहति ?

4 निम्नाङ्कित-पदेषु सन्धिं कृत्वा तस्य नाम लिखत -
सन्धिः नाम
यथा- बालकः+अवदत् = बालकोऽवदत् पूर्वरूपसन्धिः
नरः+अपराणि = ...
वेत्ता+असि = ...

कर्मणि+एव = ...
ग्लानिः+भवति = ...
सृजामि+अहम् = ...

5 अधोलिखित-पदेषु शब्दं विभक्तिं वचनं च लिखत -

पदम् शब्दः विभक्तिः वचनम्
यथा- त्वम् युष्मद् प्रथमा एकवचनम्
साधूनाम् ....
धर्मस्य ....
फलेषु ....
आत्मानम् ....
शरीराणि ....

6 अधोलिखित-विशेष्यैः सह विशेषणानि योजयत -

विशेष्यम् विशेषणम्
पुरुषः परं
शरीराणि पुराणः
निधानम् जीर्णानि

शिक्षण-सङ्केतः
(1) सर्वेषां श्लोकानां सस्वरवाचनं कारयत।
(2) कृष्णार्जुनसंवादस्य प्रसङ्गं संक्षेपेण श्रावयत।

एतदपि जानीत- तरकारी/ सब्जी - शाकम्
आलू - आलुः
परवल - पटोलः
कोंहड़ा - कूष्माण्डः
भिंडी - भिण्डकः
करेला - कारवेल्लः
मूली - मूलकम्
गाजर - गृञ्जनम्
प्याज - पलाण्डुः

षोडशः पाठः अमोघं तद् बलिदानम्

जम्मू-कश्मीरराज्यस्य कारगिलक्षेत्रे 2000 तमस्य ख्रीष्टाब्दस्य मईमासतः भारतीयसेनायाः युद्धकर्म प्रचलद् आसीत्। अवैधरूपेण देशस्य तद् भागे अन्तः प्रविष्टानाम् अतिक्रमणकारिणां निरसनाय असौ यत्नः क्रियमाणः आसीत्।
भारतस्य अस्य भूभागस्य एतत् अतिक्रमणं बहुपूर्वमेव व्यवस्थितरीत्या विचिन्त्य शत्रुभिः आरब्धम् इति तदानीम् अज्ञायत। जनवरीमासे एव भारतीयगुप्तचरविभागीयैः जम्मूकश्मीरराज्यस्य कारगिलवलये स्थितायाः सीमानियन्त्रणरेखायाः समीपे पाकिस्थानस्य किमपि विमानं दृष्टम् आसीत्, परं तदा तु तद्विषये न तावत् गभीरतया चिन्तितम् अस्मदीयैः। ततः चतुर्णां मासानाम् अनन्तरं ज्ञातं यत् अष्टशताधिकाः पाकिस्थानीयाः सैनिकाः, अफगानस्थानीयाः आतंकवादिनश्च अतिक्रमणं कृत्वा कारगिल- मष्कोह-द्रास-वलयेषु स्थितान् निर्जनपर्वतप्रदेशान् वशीकृतवन्तः इति। एते च वैदेशिकाः अतिक्रमणकारिणः सीमानियन्त्रणरेखां निस्सङ्कोचम् उल्लङ्घ्य अष्टकिलोमीटरदूरम् अन्तःप्रविष्टाः सन्ति। अतिक्रमणशीलानाम् एतेषां विताडनं विना अन्यः कोऽपि मार्गः एव नास्ति इत्यतः भारतीयसेना तत्र अयुध्यत।
कैश्चित् एव दिनैः युद्धकर्म एतत् समाप्तं भवेत् इति चिन्तितम् आसीद् आदौ। परन्तु परिस्थितेः गहनता तदा एव ज्ञाता यदा युद्धम् आरब्धम्। हिमाच्छन्ने प्रदेशे स्थित्वा शैत्यपीडां सहमानैः सैनिकैः युद्धं करणीयम् अस्ति। अतिक्रमणकारिणः तु अनेकेभ्यः मासेभ्यः तत्र सन्ति इत्यतः ते तत्रत्येन प्रतिकूलवातावरणेन सम्यक् परिचिताः सन्ति। अन्यच्च ते अतिक्रमणकारिणः न तु साधारणाः जनाः, अपितु यथोचितं प्रशिक्षणं प्राप्तवन्तः पाकिस्थानीयाः सैनिकाः एव ते। आरम्भे पाकिस्थानम् एतत् न अङ्ग्यकरोत् यत् ते तदीयाः सैनिकाः। परन्तु सैनिकैः कृतस्य निस्तन्तुवार्तालापस्य श्रवणेन निगृहीतानां केषाञ्चित् स्वीकारोक्त्या च तत् स्पष्टतया ज्ञातमेव। भारतीयाः सैनिकाः सैन्याधिकारिणश्च केचन पाकिस्थानेन निगृहीताः अपि आसन्। सर्वस्य एतस्य पर्यालोचनेन एतत् सिद्धं यत् पाकिस्थानं पुनरपि युद्धमेव अभिलषति, न शान्तिम् इति।
शान्तिप्रियाः भारतीयाः इत्यत्र नास्ति संशयः। परम् आत्मरक्षणे वयं न कदापि अलसाः उपेक्षावन्तः वा इति प्रधानमन्त्रिणा अन्यैश्च यत् उद्घोषितं तत् पाकिस्थानेन न विस्मरणीयम्। सन्दर्भेऽस्मिन् देशरक्षणार्थं स्वप्राणानेव पणीकृत्य कार्यं कृतवतः कुर्वतश्च

सर्वान् अपि योद्धृन् सगौरवं स्मरामः वयम्। तेषाम् आत्मबलिदानं व्यर्थं यथा न भवेत् तथा सर्वैः अपि प्रयतनीयम्।

शब्दार्थाः

अवैधरूपेण = गैर कानूनी रूप से। निरसनाय = हटाने के लिए। अतिक्रमणम् = सीमा से आगे बढ़ जाना। प्रेषणम् =भेजना। निस्तन्तु = तार-रहित। निगृहीतानाम् = पकड़े गये। आत्मरक्षणे = अपनी रक्षा में। पणीकृत्य = दाँव पर लगा कर। अमोघम् = सफल। पर्यालोचनेन = विचार करने से।

अभ्यासः

1 उच्चारणं कुरुत -

ख्रीष्टाब्दस्य व्यवस्थितरीत्या भारतीयगुप्तचरविभागीयैः

सीमानियन्त्रणरेखायाः निस्तन्तुवार्तालापस्य स्पष्टतया

2 एकपदेन उत्तरत -

(क) कारगिलस्थलं कस्मिन् राज्ये अस्ति ?

(ख) भारतीयगुप्तचरविभागीयैः कस्य देशस्य विमानं दृष्टमासीत् ?

(ग) शान्तिप्रियाः के सन्ति ?

(घ) अतिक्रमणकारिणः अन्तः कियद्दूरमागताः ?

(ङ) सगौरवं वयं कान् स्मरामः ?

3 एकवाक्येन उत्तरत -

(क) करगिल-युद्धं कस्मिन् वर्षे अभवत् ?

(ख) पाकिस्थानस्य विमानं कुत्र दृष्टमासीत् ?

(ग) आरम्भे पाकिस्थानं किं न अङ्ग्यकरोत् ?

(घ) हिमाच्छन्ने प्रदेशे सैनिकाः कां पीडां सहन्ते ?

(ङ) केषाम् आत्मबलिदानं व्यर्थं न भवेत्?

4 रेखांकितपदानि अवलम्व्य प्रश्ननिर्माणं कुरुत -

(क) भारतीयसेनायाः पाकिस्थानसेनया सह युद्धम् अभवत्।

(ख) नियन्त्रणरेखायाः समीपे पाकिस्थानस्य विमानं दृष्टमासीत्।

(ग) शान्तिप्रियाः भारतीयाः भवन्ति।

(घ) सैनिकानाम् आत्मबलिदानं व्यर्थं न स्यात्।

5 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -

साधारणाः व्यर्थम् नास्ति

(क) सैनिकानाम् आत्मबलिदानं .... न भवेत्।

(ख) अतिक्रमणकारिणः न तु .... जनाः आसन्।
(ग) शान्तिप्रियाः भारतीयाः इत्यत्र .... संशयः।
6 संस्कृते अनुवादं कुरुत -
(क) सीमाओं की रक्षा कौन करता है ?
(ख) हिमालय की ऊँची चोटियाँ बर्फ से ढँकी रहती हैं।
(ग) भारतीय शान्तिप्रिय होते हैं ।
(घ) कारगिल युद्ध में भारत की जीत हुई।
7 निम्नाङ्कितपदेषु लिङ्गं विभक्तिं वचनं च लिखत -

शब्दः	लिङ्गम्	विभक्तिः	वचनम्
यथा- वलये	पुंल्लिङ्गम्	सप्तमी	एकवचनम्
विभागीयैः	....	....	....
मार्गः	....	....	....
मन्त्रिणा	....	....	....
बलिदानम्	....	....	....

8 निम्नांकितेषु पदेषु उपसर्गं चित्वा लिखत -

पदम्	उपसर्गः
प्रविष्टः	....
अभिलषति	....
प्रतिकूलम्	....
प्रयत्नम्	....

शिक्षण-सङ्केतः 1. छात्रैः देशस्य सीम्नां विषये चर्चां कारयत।
2. पाश्र्ववर्तिभिः देशैः सह सम्बन्धस्य विषये पञ्चवाक्यानि संस्कृते लेखयत।
एतदपि जानीत-
वाचस्पति पुरस्कार- संस्कृत साहित्य में विशिष्ट योगदान हेतु दिया जाता है।

सप्तदशःपाठः समे भारतीयाः मिथो बान्धवाः

त्यज्यतां भारतीयैर्विभेदो मिथो
जातिजन्यो भवेद् देशजन्योऽथवा।
भेदजातेन वैरेण देशो ध्रुवं
खण्डनं प्राप्स्यति क्षीणतां यास्यति।।1।।

एक एवेश्वरः सर्वमीष्टे जगद्
नामभेदेन वैरस्यमायाति किम् ?
तेन धर्माः जगत्यां समे भासिता-
स्तर्हि विद्वेषभावः कथं कुत्रचित्।।2।।

भोजने भाषणे वेशभूषाविधौ
एकता नास्ति चेन्नास्ति कापि क्षतिः।
मानवीये स्तरे बन्धुता काम्यताम्
तेन राष्ट्रैकता साधु सम्भाव्यते।।3।।

पूर्वजैः विश्वबन्धुत्व-संस्थापने
यत्कृतं भूतलेऽस्मिन् तपश्चर्यया।
सत्पथो यत्नतोऽसौ समालम्ब्यताम्
भारतं विश्वशीर्षण्यतां नीयताम्।।4।।

हिन्दवो मुस्लिमाः सिक्खधर्मानुगाः।
आर्हताः सौगताः पारसीकाश्च ये।
मन्वते भारतं जन्मकर्मस्थलं
ते समे भारतीयाः मिथो बान्धवाः।।5।।

भेदभावं तिरस्कृत्य सम्भूय च
धर्मकामार्थचिन्तां विदध्युर्यदि।
वर्तमानाः समस्याः समाधाय ते
निश्चितं मोक्षरूपं फलं प्राप्नुयुः।।6।।

शब्दार्थाः

मिथः = परस्पर। विभेदः = भेदभाव। ध्रुवम् = निश्चय ही। भेदजातेन = भेद से उत्पन्न। ईष्टे = शासन करता है। वैरस्य = विरसता। समे = सभी। भासिताः =प्रकाशित। कुत्रचित् = कहीं। चेत् = यदि। सम्भाव्यते = सम्भावना की जाती है। सत्पथः = सन्मार्ग। आर्हताः = जैनधर्मानुयायी। सौगताः = बौद्धधर्मानुयायी। मन्वते = मानते हैं। सम्भूय = मिलकर। विदध्युः = करें । प्राप्नुयुः = प्राप्त करें। साधु = सम्यक् रूप से। विश्वशीर्षण्यताम् = विश्व में शीर्ष स्थान को ।

अन्वयः

1. भारतीयैः मिथो विभेदः त्यज्यताम्। (स विभेदः) जातिजन्यो अथवा देशजन्यो भवेत्। देशः भेदजातेन वैरेण ध्रुवं खण्डनं प्राप्स्यति क्षीणतां यास्यति च।

2. एकः एव ईश्वरः सर्वम् जगद् ईष्टे। किं नामभेदेन वैरस्यम् आयाति ? तेन (ईश्वरेण) जगत्यां समे धर्माः भासिताः, तर्हि कुत्रचित् विद्वेषभावः कथम् ?

3. भोजने भाषणे वेशभूषाविधौ (च) एकता नास्ति चेत् कापि क्षतिः नास्ति। मानवीये स्तरे बन्धुता, काम्यताम्, तेन राष्ट्रैकता साधु सम्भाव्यते।

4. पूर्वजैः विश्वबन्धुत्वसंस्थापने अस्मिन् भूतले तपश्चर्यया यत्कृतम्। असौ सत्पथः यत्नतः समालम्ब्यताम्। भारतं विश्वशीर्षण्यतां नीयताम्

5. ये हिन्दवो मुस्लिमाः सिक्खधर्मानुगाः आर्हताः सौगताः पारसीकाश्च भारतं जन्मकर्मस्थलं मन्वते ते समे भारतीयाः मिथो बान्धवाश्च।

6. (ये) भेदभावं तिरस्कृत्य सम्भूय च यदि धर्मकामार्थचिन्तां विदध्युः (तर्हि) ते वर्तमानाः समस्याः समाधाय मोक्षरूपं फलं निश्चितं प्राप्नुयुः।

अभ्यासः

1 उच्चारणं कुरुत -

भारतीयैर्विभेदः पूर्वजैर्विश्वबन्धुत्वसंस्थापने

विश्वशीर्षण्यताम् विदध्युर्यदि यत्नतोऽसौ

2 पूर्णवाक्येन उत्तरत-

(क) भारतीयैः किं त्यज्यताम् ? (ख) जगत्यां सर्वे धर्माः केन भासिताः ?

(ग) केन राष्ट्रैकता सम्भाव्यते ? (घ) किं तिरस्कृत्य धर्मकामार्थचिन्तां विदध्युः ?

3 रेखाङ्कितपदानि अवलम्ब्य प्रश्ननिर्माणं कुरुत -

(क) एक एव ईश्वरः सर्वमीष्टे जगद्।

(ख) मानवीये स्तरे बन्धुता काम्यताम्।

(ग) भारतं विश्वशीर्षण्यतां नीयताम्।

(घ) समे भारतीयाः मिथो बान्धवाः।

4 निम्नाङ्कितपदेषु सन्धिं कुरुत -

पदम् सन्धिः

यथा-तपस् + चर्या = तपश्चर्या
भूतले + अस्मिन् = ...
एव + ईश्वरः = ...
राष्ट्र + एकता = ...
5 संस्कृतभाषायाम् अनुवादं कुरुत -
(क) हमे आपस में भेदभाव नहीं करना चाहिए।
(ख) बन्धुता से राष्ट्र की एकता का विकास होता है।
(ग) समस्या का समाधान शान्ति और विवेक से होता है।
(घ) प्रेम से ईश्वर का दर्शन होता है।
6 विपरीतार्थकान् शब्दान् यथायोग्यं योजयत -
त्यज्यताम् विषमे
एकः अनेकः
वैरेण मण्डनम्
खण्डनम् प्रेम्णा
समे गृह्यताम्
7 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -
बलम् विश्वशीर्षण्यताम् भेदभावम् ईश्वरः
(क) देशवासिनः परस्परम् .... त्यजन्तु।
(ख) एकः एव .... सर्वेषाम् अस्ति।
(ग) भारतम् .... नीयताम्।
(घ) एकतायाम् .... भवति।
शिक्षण-सङ्केतः एषां श्लोकानां सस्वरपाठं कारयत, श्लोकार्थं च स्वशब्देषु लेखयत।

अष्टादशः पाठः राष्ट्रियसञ्चयः



गौरी - गुरो! अस्मिन् वृक्षे किं लम्बते ?
शिक्षकः - गौरि! किं त्वमेतद् न जानासि ?
गौरी - अहं न जानामि। गुरो! किमिदम् ?
शिक्षकः - अयं मधुकोशः।
गौरी - कस्माद् मधुकोशोऽयम् ?
शिक्षकः - गौरि! मधुमक्षिकाः शनैः शनैः पुष्परसम् आहृत्य एकत्र कुर्वन्ति। तत्र क्रमेण एकैकेन बिन्दुना इह पर्याप्तं मधु सञ्चितं भवति। तत्रैव मक्षिकाः स्थित्वा मधु रक्षन्ति। कोऽपि मधुग्रहीतुमायाति तदा मक्षिकाः तं दशन्ति।
गौरी - गुरो! एकैकेन बिन्दुना कथम् एतावान् महान् मधुकोशः जायते ?
शिक्षकः - त्वं न जानासि ? इदं वचनं प्रसिद्धमस्ति-
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
अर्थात् यथा एकैकस्य जलविन्दोः पातनेन क्रमशः घटः पूरितो भवति तथैव एकैकस्य मधुबिन्दोः सञ्चयेन महान् मधुकोशः सञ्जातः।
गौरी - आम्! ज्ञातम्। अहमपि एकैकस्य पणकस्य सञ्चयेन शतं रूप्यकाणि सञ्चितवती।
शिक्षकः - एतस्य द्रव्यस्य प्रयोगं त्वं कथं करिष्यसि ?
गौरी - गुरो ! मया ह्यः दूरदर्शने दृष्टं यत् अनेके जनाः जलप्लावनात् पीडिताः सन्ति। अतः पीडितजनानां सहायतामहम् अनेन द्रव्येण करिष्यामि ?
शिक्षकः - बाढम्! त्वं द्वे कार्ये साधु अकरोः। प्रथमं स्वव्ययार्थं प्राप्तस्य धनस्य सञ्चयः, द्वितीयं च तस्य सञ्चितस्य धनस्य जलप्लावपीडितजनानां सहायतार्थं प्रदानम्।



(कक्षायाम् अन्यान् छात्रान् सम्बोध्य)
शिक्षकः - छात्राः! गौरीं पश्यत, अनया स्वव्ययार्थं प्राप्तस्य धनस्य न केवलं सञ्चयः कृतः अपितु जलप्लावपीडितेभ्यः प्रदाय सदुपयोगः कृतः।
गौरी - गुरो! धनसञ्चयस्तु कोषालयमाध्यमेन पत्रालयमाध्यमेन च भवति। कृपया भवान् तद्विषये अस्मान् उपदिशतु।
शिक्षकः - साधु! छात्राः! देशस्य आर्थिकविकासाय, सामाजिकविकासाय औद्योगिकविकासाय च धनम् आवश्यकम्। धनप्राप्तिसाधनेषु करग्रहणम्, उद्योगानाम्

उत्पादनम् निर्यातश्च सन्ति। कोषालयमाध्यमेन पत्रालयमाध्यमेन च नागरिकाः राष्ट्रियसञ्चययोजनान्तर्गतं धनसंग्रहं कुर्वन्ति।

एकः छात्रः - राष्ट्रियसञ्चययोजना का ?

शिक्षकः - शासनेन नगरेषु ग्रामेषु च कोषालयानां पत्रालयानां च शाखाः स्थापिताः सन्ति। तासु बालकाःबालिकाः वयस्काश्च धनसञ्चयं कर्तुं शक्नुवन्ति। तत्र पत्रालयानां सेवा विशेषरूपेण उल्लेखनीया अस्ति।

छात्रः - तत् कथम् ?

शिक्षकः - पत्रालयसञ्चालिताः अनेकाः सञ्चययोजनाः सन्ति।

गौरी - ताः काः ?

शिक्षकः - सञ्चयपुरस्कारयोजना,संरक्षितसञ्चययोजना, सावधिसञ्चययोजना, भविष्यनिधियोजना इत्यादयः।

एका छात्रा - अहो! पत्रालयमाध्यमेन वह्व्यः सञ्चययोजनाः सञ्चालिताः सन्ति।

शिक्षकः - अथ किम्? छात्राणां लाभाय पत्रालयमाध्यमेन विद्यालयेषु सञ्चायिकायोजनायाः अपि व्यवस्था अस्ति।

छात्रः - गुरो! सञ्चायिकायोजनाविषये किञ्चद् वदतु।

शिक्षकः - अवश्यम्, शृणुत। सञ्चायिकायोजनायां सञ्िचतधनस्य प्रतिशतं पञ्चसप्ततिभागं सावधियोजनायां सञ्चेतुं सुविधा अस्ति। यस्य वार्षिकलाभः भवति। अनेन सह विद्यालयेषु योजनाकार्यस्य सञ्चालकेभ्यः शिक्षकेभ्यः पुरस्कारप्रदानस्य व्यवस्था अस्ति।

एकः छात्रः - गुरो! यदि एवं तर्हि वयम् अपि स्वकीयं धनं पत्रालयेषु सञ्िचतं करिष्यामः।

शिक्षकः - अवश्यं कुरुत। आसां सर्वासां योजनानां विषये विवरणं पत्रालयेभ्यः प्राप्तुं शक्यते। छात्राः! राष्ट्रियसञ्चययोजनाः व्यक्तेः समाजस्य, राष्ट्रस्य च विकासाय सहायिकाः सन्ति। भारतसदृशविकासशीलदेशेषु तु आसां योजनानां महती उपयोगिता अस्ति। उक्तमपि-

क्षणशः कणशश्चैव विद्यामर्थञ्च चिन्तयेत्।

शब्दार्थाः

बाढम् = शाबाश!। जलप्लावम् = बाढ़। प्रसाराय = विस्तार या प्रचार के लिए। क्षणशः = पल-पल भर समय का उपयोग करके। कणशः = कण-कण से, थोड़ा-थोड़ा करके। मधुकोशः = मधुमक्खियों का छत्ता। आहृत्य = हरण कर। एकैकेन बिन्दुना = एक-एक बूँद से। सञ्िचतम् = इकट्ठा। आयाति = आता है। मक्षिकाः = मक्खियाँ। दशन्ति = डस लेती हैं। निपातेन = गिरने से। पूर्य्यते = भर जाता है। पणकस्य = पैसे के। ह्यः = गत दिन, कल (बीता हुआ)। जलप्लावनात् = बाढ़ से।

अभ्यासः

1 उच्चारणं कुरुत -
आहृत्य शक्नुवन्ति जलप्लावपीडितेभ्यः
शृणुत स्वव्ययार्थम् भारतसदृशविकासशीलदेशेषु
2 एकपदेन उत्तरत -
(क) जलविन्दुनिपातेन क्रमशः कः पूर्यते ?
(ख) नागरिकाः राष्ट्रियसञ्चययोजनान्तर्गतं कि कुर्वन्ति ?
(ग) वृक्षे किं लम्बते ?
(घ) मधुमक्षिकाः शनैः-शनैः किम् आहृत्य एकत्र कुर्वन्ति ?
3 एकवाक्येन उत्तरत -
(क) शासनेन नगरेषु ग्रामेषु च काः स्थापिताः सन्ति ?
(ख) गौर्या ह्यः दूरदर्शने किं दृष्टम् ?
(ग) धनसञ्चयः केन माध्यमेन भवति ?
(घ) गौरी सञ्िचतद्रव्यस्य उपयोगं कुत्र करिष्यति ?
5 अधोलिखितपदानां सन्धि-विच्छेदं कुरुत -
एकैकेन = ... + ...
तत्रैव = ... + ...
बालिकाश्च = ... + ...
कोषालयः = ... + ...
6 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -
धनसङ्ग्रहं पत्रालयमाध्यमेन रूप्यकाणि एकत्रितम्
(क) मधुमक्षिकाः शनैः शनैः पुष्परसम् आहृत्य ....कुर्वन्ति।
(ख) अहमपि एकैकस्य पणकस्य सञ्चयेन शतं ....सञ्चितवती।
(ग) धनसञ्चयस्तु कोषालयमाध्यमेन ....च भवति।
(घ) नागरिकाः राष्ट्रियसञ्चययोजनान्तर्गतं................... कुर्वन्ति।
7 प्रश्नानामुत्तराणि लिखत -
(क) राष्ट्रीयसञ्चययोजनायाः के लाभाः सन्ति ?
(ख) विद्यालयेषु सञ्चयस्य महत्त्वं किमस्ति ?
(ग) छात्रैः कृतस्य धनसञ्चयस्य का आवश्यकता अस्ति?
8 संस्कृतभाषायाम् अनुवादं कुरुत -
(क) तुमने यह धन किस प्रकार प्राप्त किया।
(ख) मैं इस धन का उपयोग बाढ़ पीड़ितों के लिए करूँगा।
(ग) मधुमक्खियाँ फूल के रस से मधु जुटाती हैं।
(ध) पानी की एक-एक बूँद से घड़ा भर जाता है।

शिक्षण-सङ्केतः
भूकम्प-सुनामी-अकाल-सदृशानां विपदां विषये छात्रैः परस्परं चर्चां कारयत।
एतदपि जानीत-
कुछ संस्कृत पत्रिकाओं के नाम-

गाण्डीवम्	साप्ताहिकी	सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी।
उद्यानपत्रिका	मासिकी	तिरूपति आन्ध्रप्रदेश।
अभिनवसंस्कृतम्	वार्षिकी	कानपुर।
अनादिवाक्	त्रैमासिकी	नई दिल्ली।
अर्वाचीनसंस्कृतम्	त्रैमासिकी	नई दिल्ली।
गीर्वाणसुधा	वार्षिकी	मुम्बई।
दिव्यज्योतिः	मासिकी	शिमला।
पारिजातम्	मासिकी	कानपुर।
प्रियंवदा	द्विमासिकी	पुरी, उड़ीसा।
सम्भाषण-सन्देशः	मासिकी	बंगलौर।
भारतमुद्रा	मासिकी	केरल।
ललिता	मासिकी	वाराणसी।
लोकसंस्कृतम्	मासिकी	पाण्डिचेरी।
ब्रजगन्धा	त्रैमासिकी	मथुरा।
विश्वभाषा	त्रैमासिकी	वाराणसी।
सत्यानन्दम्	मासिकी	कोलकाता।
वाकोवाक्यम्	षाण्मासिकी	वाराणसी।

ऊनविंशः पाठः एत बालकाः

(लोट्-लकारः)
एत बालकाः ! स्वयं चलाम।
काठिन्यं दूरे करवाम।।1।।
एत नयाम नभस्तारकम्।
दूरे कुर्मश्चान्धकारकम्।।2।।
एत पर्वतानपि परिमाम।
शक्तिसमुदयं नैव जहाम।।3।।
एत सागरं प्रति गच्छाम।
जीवनकलशं ननु विभराम।।4।।
एतातुलितां शक्तिं लब्ध्वा,
पौरुषेण खलु भाग्यं बद्ध्वा।
एत विदध्म तपो नवीनम्,
पूरयेम वाञ्छाकमनीयम्।।5।।
सेवामहै जनांश्च निकामम्।
लोभं विना सुधापाः कामम्।।6।।
एत जयेम मनांसि जनानाम्
जीवनमिह सफलं बालानाम्।।7।।
एत विकुर्मो भ्रान्तिसमूहम्।
दर्शयेम नवमार्गारोहम्।।8।।
एत मङ्गलं बहु वितरेम।
विश्वमनल्पं लघु कलयेम।।9।।

शब्दार्थाः

एत = आओ। नयाम = ले आयें। अन्धकारकम् = अंधकार को । परिमाम = नाप लें। जहाम = त्याग करें। विभराम = पूर्ण करें, भरें। अतुलिताम् = अतुलनीय, अपरिमित। लब्ध्वा = प्राप्त कर। बद्ध्वा = बाँधकर। विदध्म = विधान करें। पूरयेम = पूर्ण करें। वाञ्छाकमनीयम् = इच्छित सुन्दर कामना को। सेवामहै = सेवा करें। निकामम् = पर्याप्त, यथेच्छ। सुधापाः = अमृतपान करने वाले। कामम् = कामना के अनुसार। इह = यहाँ। विकुर्मः = दूर करते हैं।

दर्शयेम = दिखायें। नवमार्गारोहम् = नये मार्ग पर चलना। अनल्पम् = सम्पूर्ण । कलयेम = बनावें।

अभ्यासः

1 उच्चारणं कुरुत -

विदध्म वाञ्छा नभस्तारकम्

अन्धकारकम् पौरुषेण सेवामहै

2 एकपदेन उत्तरत -

(क) काठिन्यं किं करवाम ?

(ख) वयं किं परिमाम ?

(ग) किं दूरे कुर्मः ?

(घ) किं विभराम ?

3 एकवाक्येन उत्तरत -

(क) काठिन्यं दूरं कर्तुं वयं किं करवाम ?

(ख) वयं किं नैव जहाम ?

(ग) तपः कृत्वा किं पूरयेम ?

(घ) भ्रान्तिसमूहं दूरं कृत्वा वयं किं दर्शयेम ?

4 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -

(क) जनानां मनांसि जयेम।

(ख) मङ्गलं बहु वितरेम।

(ग) वयं नभस्तारकं नयाम ।

5 मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत -

जयन्तु गच्छतु नय करवाणि

(क) अहं काठिन्यं दूरे ....?

(ख) त्वं नभस्तारकम् ....।

(ग) सः सागरं प्रति ....।

(घ) ते जनानां मनांसि ....।

6 संस्कृते अनुवादं कुरुत -

(क) कठिनता को हम दूर करें।

(ख) हम सब अन्धकार को दूर करें।

(ग) सागर की ओर चलें।

(घ) हम भ्रान्तियों को दूर करें।

7 हिन्दीभाषायाम् अनुवादं कुरुत -

(क) बालकाः एत स्वयं चलाम।

(ख) नभस्तारकं नयाम।
(ग) शक्तिसमुदयं नैव जहाम।
(घ) जीवनकलशं निश्चयेन विभराम।
एतदपि जानीत-
‘यूरोप में सर्वप्रथम संस्कृत-अध्ययन का प्रचार विलियम जोन्स ने किया।’

परिशिष्टम् व्याकरणम्

सन्धिः

पूर्वरूपसन्धि नियम- 'एङः पदान्तादति' - यदि किसी पद (शब्दरूप या धातुरूप) के अन्त में एङ् (ए अथवा ओ) आये और उसके बाद अ आये तो पूर्व और पर के स्थान में क्रमशः ए अथवा ओ हो जाता है और वहाँ पूर्वरूप-सूचक अवग्रह (ऽ) का चिह्न लग जाता है, जैसे-हरे + अव = हरेऽव, विष्णो + अव = विष्णोऽव, वने + अत्र = वनेऽत्र, बालो + अवदत् = बालोऽवदत्, लभे + अहम् = लभेऽहम्।

श्चुत्वसन्धि नियम- 'स्तोः श्चुना श्चुः' - स् तथा तवर्ग (त, थ, द, ध, न) के स्थान में श् तथा चवर्ग (च, छ, ज झ, ´) हो जाता है, यदि उसका श् या चवर्ग के साथ योग हो, जैसे-बालस् + शेते = बालश्शेते, गजस् + चलति = गजश्चलति, सत् + चित् = सच्चित्, शार्ङ्गिन् + जयः = शार्ङ्गिञ्जयः । सद्+ जनः = सज्जनः, कस् + चित् = कश्चित्।

जश्त्वसन्धि नियम- 'झलां जशोऽन्ते' - पदान्त झल् (वर्ग का प्रथम, द्वितीय, तृतीय तथा चतुर्थ अक्षर तथा ऊष्म वर्ण (श, ष, स, ह) के स्थान में जश् (अपने वर्ग का तृतीय अक्षर) हो जाता है, जैसे-वाक् + ईशः = वागीशः, चित् + आनन्दः = चिदानन्दः, षट् + एव = षडेव, उत् + देश्यम् = उद्देश्यम्। सुप् + अन्तः = सुबन्तः। सत् + आचारः = सदाचारः।
अनुस्वार - 'मोऽनुस्वारः' - पदान्त 'म्' को अनुस्वार हो जाता है, हल् (व्यञ्जन) वर्ण के परे रहने पर, जैसे- हरिम् + वन्दे = हरिं वन्दे, कार्यम् + कुरु = कार्यं कुरु, सत्यम् + वद = सत्यं वद।

शब्दरूपाणि

संज्ञा-शब्दाः

पुंल्लिङ्गम्

आत्मन्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्

प्रथमा	आत्मा	आत्मानौ	आत्मानः
द्वितीया	आत्मानम्	आत्मानौ	आत्मनः
तृतीया	आत्मना	आत्मभ्याम्	आत्मभिः
चतुर्थी	आत्मने	आत्मभ्याम्	आत्मभ्यः
पञ्चमी	आत्मनः	आत्मभ्याम्	आत्मभ्यः
षष्ठी	आत्मनः	आत्मनोः	आत्मनाम्
सप्तमी	आत्मनि	आत्मनोः	आत्मसु
सम्बोधनम्	हे आत्मन्!	हे आत्मानौ!	हे आत्मानः!

इसी प्रकार अश्मन् (पत्थर), अध्वन् (मार्ग), ब्रह्मन् (ब्रह्मा) इत्यादि के रूप चलते हैं।

राजन् (राजा)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	राजा	राजानौ	राजानः
द्वितीया	राजानम्	राजानौ	राज्ञः
तृतीया	राज्ञा	राजभ्याम्	राजभिः
चतुर्थी	राज्ञे	राजभ्याम्	राजभ्यः
पञ्चमी	राज्ञः	राजभ्याम्	राजभ्यः
षष्ठी	राज्ञः	राज्ञोः	राज्ञाम्
सप्तमी	राज्ञि/राजनि	राज्ञोः	राजसु
सम्बोधनम्	हे राजन्!	हे राजानौ!	हे राजानः!

विद्वस् (विद्वान)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्

प्रथमा	विद्वान्	विद्वांसौ	विद्वांसः
द्वितीया	विद्वांसम्	विद्वांसौ	विदुषः
तृतीया	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
चतुर्थी	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
पञ्चमी	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
षष्ठी	विदुषः	विदुषोः	विदुषाम्
सप्तमी	विदुषि	विदुषोः	विद्वत्सु
सम्बोधनम्	हे विद्वन्!	हे विद्वांसौ!	हे विद्वांसः!

इसका स्त्रीलिङ्ग विदुषी होता है, जिसका रूप नदी के समान चलता है।

स्त्रीलिङ्गम्

मातृ (माता)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	माता	मातरौ	मातरः
द्वितीया	मातरम्	मातरौ	मात§□
तृतीया	मात्रा	मातृभ्याम्	मातृभिः
चतुर्थी	मात्रे	मातृभ्याम्	मातृभ्यः
पञ्चमी	मातुः	मातृभ्याम्	मातृभ्यः
षष्ठी	मातुः	मात्रोः	मातृणाम्
सप्तमी	मातरि	मात्रोः	मातृषु
सम्बोधनम्	हे मातः!	हे मातरौ!	हे मातरः!

इसी प्रकार दुहितृ (पुत्री), यातृ (देवरानी) आदि का रूप चलता है।

वाच् (वाणी)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वाक्/वाग्	वाचै	वाचः
द्वितीया	वाचम्	वाचै	वाचः
तृतीया	वाचा	वाग्भ्याम्	वाग्भिः
चतुर्थी	वाचे	वाग्भ्याम् ्	वाग्भ्यः
पञ्चमी	वाचः	वाग्भ्याम्	वाग्भ्यः
षष्ठी	वाचः	वाचोः	वाचाम्
सप्तमी	वाचि	वाचोः	वाक्षु
सम्बोधनम्	हे वाक्/वाग्!	हे वाचै!	हे वाचः!

इसी प्रकार त्वच्, शुच्, रुच्, ऋच्, आदि शब्दों के रूप चलते हैं।

सरित् (नदी)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सरित्	सरितौ	सरितः
द्वितीया	सरितम्	सरितौ	सरितः
तृतीया	सरिता	सरिद्भ्याम्	सरिद्भिः
चतुर्थी	सरिते	सरिद्भ्याम्	सरिद्भ्यः
पञ्चमी	सरितः	सरिद्भ्याम्	सरिद्भ्यः
षष्ठी	सरितः	सरितोः	सरिताम्
सप्तमी	सरिति	सरितोः	सरित्सु
सम्बोधनम्	हे सरित्!	हे सरितौ!	हे सरितः!

इसी प्रकार विद्युत ्, योषित् (स्त्री) आदि शब्दों के रूप चलते हैं।

दिक् (दिशा)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दिक्/दिग्	दिशौ	दिशः
द्वितीया	दिशम्	दिशौ	दिशः
तृतीया	दिशा	दिग्भ्याम्	दिग्भिः
चतुर्थी	दिशे	दिग्भ्याम्	दिग्भ्यः
पञ्चमी	दिशः	दिग्भ्याम्	दिग्भ्यः
षष्ठी	दिशः	दिशोः	दिशाम्
सप्तमी	दिशि	दिशोः	दिक्षु
सम्बोधनम्	हे दिक्/दिग्!	हे दिशौ!	हे दिशः!

नपंुसकलिङ्गम्
जगत् (संसार)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	जगत्/जगद्	जगती	जगन्ति
द्वितीया	जगत्/जगद्	जगती	जगन्ति
तृतीया	जगता	जगद्भ्याम्	जगद्भिः
चतुर्थी	जगते	जगद्भ्याम्	जगद्भ्यः
पञ्चमी	जगतः	जगद्भ्याम्	जगद्भ्यः
षष्ठी	जगतः	जगतोः	जगताम्
सप्तमी	जगति	जगतोः	जगत्सु
सम्बोधनम्	हे जगत्!	हे जगती!	हे जगन्ति!

इसी प्रकार तकारान्त नपुंसकलिङ्ग शब्दों के रूप चलते हैं।

नामन् (नाम)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	नाम	नाम्नी/नामनी	नामानि
द्वितीया	नाम	नाम्नी/नामनी	नामानि
तृतीया	नाम्ना	नामभ्याम्	नामभिः
चतुर्थी	नाम्ने	नामभ्याम्	नामभ्यः
पञ्चमी	नाम्नः	नामभ्याम्	नामभ्यः
षष्ठी	नाम्नः	नाम्नोः	नाम्नाम्
सप्तमी	नाम्नि/नामनि	नाम्नोः	नामसु
सम्बोधनम्	हे नाम/नामन्!	हे नाम्नी/नामनी!	हे नामानि!

पयस् (पानी, दूध)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पयः	पयसी	पयांसि
द्वितीया	पयः	पयसी	पयांसि
तृतीया	पयसा	पयोभ्याम्	पयोभिः
चतुर्थी	पयसे	पयोभ्याम्	पयोभ्यः
पञ्चमी	पयसः	पयोभ्याम्	पयोभ्यः
षष्ठी	पयसः	पयसोः	पयसाम्
सप्तमी	पयसि	पयसोः	पयस्सु/पयःसु
सम्बोधनम्	हे पयः!	हे पयसी!	हे पयांसि!

इसी प्रकार उरस्, नभस्, अयस्, तमस्, वचस्, यशस्, तपस्, शिरस्, रजस्, आदि सकारान्त नपुंसकलिङ्ग शब्दों के रूप चलते हैं।

मनस् (मन)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मनः	मनसी	मनांसि
द्वितीया	मनः	मनसी	मनांसि
तृतीया	मनसा	मनोभ्याम्	मनोभिः
चतुर्थी	मनसे	मनोभ्याम्	मनोभ्यः
पञ्चमी	मनसः	मनोभ्याम्	मनोभ्यः
षष्ठी	मनसः	मनसोः	मनसाम्
सप्तमी	मनसि	मनसोः	मनस्सु
सम्बोधनम्	हे मन!	हे मनसी!	हे मनांसि!

भवत् (आप)

पुंल्लिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भवान्	भवन्तौ	भवन्तः
द्वितीया	भवन्तम्	भवन्तौ	भवतः
तृतीया	भवता	भवद्भ्याम्	भवद्भिः
चतुर्थी	भवते	भवद्भ्याम	भवद्भ्यः
पञ्चमी	भवतः	भवद्भ्याम्	भवद्भ्यः
षष्ठी	भवतः	भवतोः	भवताम्
सप्तमी	भवति	भवतोः	भवत्सु

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भवती	भवत्यौ	भवत्यः
द्वितीया	भवतीम्	भवत्यौ	भवतीः
तृतीया	भवत्या	भवतीभ्याम्	भवतीभिः
चतुर्थी	भवत्यै	भवतीभ्याम्	भवतीभ्यः
पञ्चमी	भवत्याः	भवतीभ्याम्	भवतीभ्यः
षष्ठी	भवत्याः	भवतोः	भवतीभ्यः
सप्तमी	भवति	भवतोः	भवत्सु

सर्वनामशब्दाः
अदस् (यह)
पुंल्लिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	असौ	अमू	अमी
द्वितीया	अमुम्	अमू	अमून्
तृतीया	अमुना	अमूभ्याम्	अमीभिः
चतुर्थी	अमुष्मै	अमूभ्याम्	अमीभ्यः
पञ्चमी	अमुष्मात्	अमूभ्याम्	अमीभ्यः
षष्ठी	अमुष्य	अमुयोः	अमीषाम्
सप्तमी	अमुष्मिन्	अमुयोः	अमीषु

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	असौ	अमू	अमूः
द्वितीया	अमुम्	अमू	अमूः
तृतीया	अमुया	अमूभ्याम्	अमूभिः
चतुर्थी	अमुष्यै	अमूभ्याम्	अमूभ्यः
पञ्चमी	अमुष्याः	अमूभ्याम्	अमूभ्यः
षष्ठी	अमुष्याः	अमुयोः	अमूषाम्
सप्तमी	अमुष्याम्	अमुयोः	अमूषु

नपंुसकलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अदः	अमू	अमूनि
द्वितीया	अदः	अमू	अमूनि
तृतीया	अमुना	अमूभ्याम्	अमीभिः
चतुर्थी	अमुष्मै	अमूभ्याम्	अमीभ्यः
पञ्चमी	अमुष्मात्	अमूभ्याम्	अमीभ्यः
षष्ठी	अमुष्य	अमुयोः	अमीषाम्
सप्तमी	अमुष्मिन्	अमुयोः	अमीषु

एतत् (यह)
पुंल्लिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषः	एतौ	एते

द्वितीया	एतम्/एनम्	एतौ/एनौ	एतान्/एनान्
तृतीया	एतेन/एनेन	एताभ्याम्	एतैः
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्यः
षष्ठी	एतस्य	एतयोः/एनयोः	एतेषाम्
सप्तमी	एतस्मिन्	एतयोः/एनयोः	एतेषु

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषा	एते	एताः
द्वितीया	एताम्	एते	एताः
तृतीया	एतया	एताभ्याम्	एताभिः
चतुर्थी	एतस्यै	एताभ्याम्	एताभ्यः
पञ्चमी	एतस्याः	एताभ्याम्	एताभ्यः
षष्ठी	एतस्याः	एतयोः	एतासाम्
सप्तमी	एतस्याम्	एतयोः	एतासु

नपुसकलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतत्	एते	एतानि
द्वितीया	एतत्/एनत्	एते	एतानि

शेष विभक्तियों में पुंल्लिङ्ग के समान रूप चलते हैं।

संख्याएँ

01 से 04 तक की संख्याओं के रूप कक्षा 7 में बताये जा चुके हैं। यहाँ 05 से 10 तक की संख्याओं के तीनों लिङ्गों में रूप दिये जा रहे हैं-

पञ्चन् षष्, सप्तन्, अष्टन्, नवन्, दशन्

(पुंल्लिङ्ग, स्त्रीलिङ्ग तथा नपंुसकलिङ्ग में)

विभक्तिः

प्रथमा	पञ्च	षट्/षड्	सप्त	अष्टौ/अष्ट	नव	दश
द्वितीया	पञ्च	षट्/षड्	सप्त	अष्टौ/अष्ट	नव	दश
तृतीया	पञ्चभिः	षड्भिः	सप्तभिः	अष्टाभिः/अष्टभिः	नवभिः	दशभिः
चतुर्थी	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टाभ्यः/अष्टभ्यः	नवभ्यः	दशभ्यः
पञ्चमी	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टाभ्यः/अष्टभ्यः	नवभ्यः	दशभ्यः
षष्ठी	पञ्चानाम्	षण्णाम्	सप्तानाम्	अष्टानाम्	नवानाम्	दशानाम्
सप्तमी	पञ्चसु	षट्सु	सप्तसु	अष्टसु	नवसु	दशसु
सम्बोधन	हे पञ्च!	हेषट्/षड्!	हे सप्त!	हे अष्टौ!/अष्ट!	हे नव!	हे दश!

एक से पचास तक की संख्याएँ निम्नवत् हैं-

एक	1	एकम्	अट्ठारह	18	अष्टादश
दो	2	द्वे	उन्नीस	19	एकोनविंशतिः
तीन	3	त्रीणि	बीस	20	विंशतिः
चार	4	चत्वारि	इक्कीस	21	एकविंशतिः
पाँच	5	पञ्च	बाईस	22	द्वाविंशतिः
छह	6	षड्	तेईस	23	त्रयोविंशतिः

सात	7	सप्त	चैबीस	24	चतुर्विंशतिः
आठ	8	अष्ट	पच्चीस	25	पञ्चविंशतिः
नौ	9	नव	छब्बीस	26	षड्विंशतिः
दस	10	दश	सत्ताईस	27	सप्तविंशतिः
ग्यारह	11	एकादश	अट्ठाईस	28	अष्टाविंशतिः
बारह	12	द्वादश	उन्तीस	29	नवविंशतिः
तेरह	13	त्रयोदश	तीस	30	त्रिंशत्
चैदह	14	चतुर्दश	इकतीस	31	एकत्रिंशत्
पन्द्रह	15	पञ्चदश	बत्तीस	32	द्वात्रिंशत्
सोलह	16	षोडश	तैंतीस	33	त्रयस्त्रिंशत्
सत्रह	17	सप्तदश	चैतीस	34	चतुस्त्रिंशत्
पैंतीस	35	पञ्चत्रिंशत्	तैंतालीस	43	त्रयश्चत्वारिंशत्/त्रिचत्वारिंशत्
छत्तीस	36	षट्त्रिंशत्	चवालीस	44	चतुश्चत्वारिंशत्
सैंतीस	37	सप्तत्रिंशत्	पैंतालीस	45	पञ्चचत्वारिंशत
अड़तीस	38	अष्टात्रिंशत्	छियालीस	46	षट्चत्वारिंशत्
उन्तालीस	39	नवत्रिंशत्/उनचत्वारिंशत्	सैंतालीस	47	सप्तचत्वारिंशत्
चालीस	40	चत्वारिंशत्	अड़तालीस	48	अष्टाचत्वारिंशत्
एकतालीस	41	एकचत्वारिंशत्	उनचास	49	नवचत्वारिंशत/ऊनपञ्चाशत्
बयालीस	42	द्वाचत्वारिंशत्	पचास	50	पञ्चाशत्

विशेषण

विशाल
पुंल्लिङ्गम्

विभक्तिः	एकववचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विशालः	विशालौ	विशालाः
द्वितीया	विशालम्	विशालौ	विशालान्
तृतीया	विशालेन	विशालाभ्याम्	विशालैः
चतुर्थी	विशालाय	विशालाभ्याम्	विशालेभ्यः
पञ्चमी	विशालात्	विशालाभ्याम्	विशालेभ्यः
षष्ठी	विशालस्य	विशालयोः	विशालानाम्
सप्तमी	विशाले	विशालयोः	विशालेषु
सम्बोधनम्	हे विशाल!	हे विशालौ!	हे विशालाः!

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विशाला	विशाले	विशालाः
द्वितीया	विशालाम्	विशाले	विशालाः
तृतीया	विशालया	विशालाभ्याम्	विशालाभिः
चतुर्थी	विशालायै	विशालाभ्याम्	विशालाभ्यः
पञ्चमी	विशालायाः	विशालाभ्याम्	विशालाभ्यः
षष्ठी	विशालायाः	विशालयोः	विशालानाम्
सप्तमी	विशालायाम्	विशालयोः	विशालासु
सम्बोधनम्	हे विशाले!	हे विशाले!	हे विशालाः!

नपंुसकलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विशालम्	विशाले	विशालानि
द्वितीया	विशालम्	विशाले	विशालानि
तृतीया	विशालेन	विशालाभ्याम्	विशालैः
चतुर्थी	विशालाय	विशालाभ्याम्	विशालेभ्यः
पञ्चमी	विशालात्	विशालाभ्याम्	विशालेभ्यः
षष्ठी	विशालस्य	विशालयोः	विशालानाम्
सप्तमी	विशाले	विशालयोः	विशालेषु
सम्बोधनम्	हे विशाल!	हे विशालौ!	हे विशालाः!

दीर्घ

पुंल्लिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दीर्घः	दीर्घौ	दीर्घाः
द्वितीया	दीर्घम्	दीर्घौ	दीर्घान्
तृतीया	दीर्घेण	दीर्घाभ्याम्	दीर्घैः
चतुर्थी	दीर्घाय	दीर्घाभ्याम्	दीर्घेभ्यः
पञ्चमी	दीर्घात्	दीर्घाभ्याम्	दीर्घेभ्यः
षष्ठी	दीर्घस्य	दीर्घयोः	दीर्घाणाम्
सप्तमी	दीर्घे	दीर्घयोः	दीर्घेषु
सम्बोधनम्	हे दीर्घ!	हे दीर्घौ!	हे दीर्घाः!

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दीर्घा	दीर्घे	दीर्घाः
द्वितीया	दीर्घाम्	दीर्घे	दीर्घाः
तृतीया	दीर्घया	दीर्घाभ्याम्	दीर्घाभिः
चतुर्थी	दीर्घायै	दीर्घाभ्याम्	दीर्घाभ्यः
पञ्चमी	दीर्घायाः	दीर्घाभ्याम्	दीर्घाभ्यः
षष्ठी	दीर्घायाः	दीर्घयोः	दीर्घाणाम्
सप्तमी	दीर्घायाम्	दीर्घयोः	दीर्घासु
सम्बोधनम्	हे दीर्घे!	हे दीर्घे!	हे दीर्घाः!

नपुंसकलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दीर्घम्	दीर्घे	दीर्घाणि
द्वितीया	दीर्घम्	दीर्घे	दीर्घाणि
तृतीया	दीर्घेण	दीर्घाभ्याम्	दीर्घैः
चतुर्थी	दीर्घाय	दीर्घाभ्याम्	दीर्घेभ्यः
पञ्चमी	दीर्घात्	दीर्घाभ्याम्	दीर्घेभ्यः
षष्ठी	दीर्घस्य	दीर्घयोः	दीर्घाणाम्
सप्तमी	दीर्घे	दीर्घयोः	दीर्घेषु
सम्बोधनम्	हे दीर्घ!	हे दीर्घौ!	हे दीर्घाः!

शोभन

पुंल्लिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	शोभनः	शोभनौ	शोभनाः
द्वितीया	शोभनम्	शोभनौ	शोभनान्
तृतीया	शोभनेन	शोभनाभ्याम्	शोभनैः
चतुर्थी	शोभनाय	शोभनाभ्याम्	शोभनेभ्यः
पञ्चमी	शोभनात्	शोभनाभ्याम्	शोभनेभ्यः
षष्ठी	शोभनस्य	शोभनयोः	शोभनानाम्
सप्तमी	शोभने	शोभनयोः	शोभनेषु
सम्बोधन	हे शोभन!	हे शोभनौ!	हे शोभनाः!

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	शोभना	शोभने	शोभनाः
द्वितीया	शोभनाम्	शोभने	शोभनाः
तृतीया	शोभनया	शोभनाभ्याम्	शोभनाभिः
चतृर्थी	शोभनायै	शोभनाभ्याम्	शोभनाभ्यः
पञ्चमी	शोभनायाः	शोभनाभ्याम्	शोभनाभ्यः
षष्ठी	शोभनायाः	शोभनयोः	शोभनानाम्
सप्तमी	शोभनायाम्	शोभनयोः	शोभनासु
सम्बोधनम्	हे शोभने!	हे शोभने!	हे शोभनाः!

नपुंसकलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्

प्रथमा	शोभनम्	शोभने	शोभनानि
द्वितीया	शोभनम्	शोभने	शोभनानि
तृतीया	शोभनेन	शोभनाभ्याम्	शोभनैः
चतुर्थी	शोभनाय	शोभनाभ्याम्	शोभनेभ्यः
पञ्चमी	शोभनात्	शोभनाभ्याम्	शोभनेभ्यः
षष्ठी	शोभनस्य	शोभनयोः	शोभनानाम्
सप्तमी	शोभने	शोभनयोः	शोभनेषु
सम्बोधनम्	हे शोभन!	हे शोभनौ!	हे शोभनाः!

लघु (छोटा)
पुंल्लिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	लघुः	लघू	लघवः
द्वितीया	लघुम्	लघू	लघून्
तृतीया	लघुना	लघुभ्याम्	लघुभिः
चतुर्थी	लघवे	लघुभ्याम्	लघुभ्यः
पञ्चमी	लघोः	लघुभ्याम्	लघुभ्यः
षष्ठी	लघोः	लघ्वोः	लघूनाम्
सप्तमी	लघौ	लघ्वोः	लघुषु
सम्बोधनम्	हे लघो!	हे लघू!	हे लघवः!

स्त्रीलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्

प्रथमा	लघुः/लघ्वी	लघू/लघ्व्यौ	लघवः/लघ्व्यः
द्वितीया	लघुम्/लघ्वीम्	लधू/लघ्व्यौ	लघूः/लघ्वीः
तृतीया	लघ्वा/लघ्व्या	लघुभ्याम्/लघ्वीभ्याम्	लधुभिः/लघ्वीभिः
चतुर्थी	लघ्वै/लघवे/लघ्व्यै	लघुभ्याम्/लघ्वीभ्याम्	लघुभ्यः/लघ्वीभ्यः
पञ्चमी	लघ्वाः/लघोः/लघ्व्यै	लघुभ्याम्/लघ्वीभ्याम्	लघुभ्यः/लघ्वीभ्यः
षष्ठी	लघ्वाः/लघोः/लघ्व्यः	लघ्वोः/लघ्व्योः	लघूनाम्/लघ्वीनाम्
सप्तमी	लघ्वाम्/लघौ/लघ्व्याम्	लघ्वोः/लघ्व्योः	लघुषु/लघ्वीषु
सम्बोधनम्	हे लघो/हे लघ्वि!	हे लघू/हे लघ्व्यौ!	हे लघवः/लघ्व्यः!

नपुंसकलिङ्गम्

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	लघु	लघुनी	लघूनि
द्वितीया	लघु	लघुनी	लघूनि
तृतीया	लघुना	लघुभ्याम्	लघुभिः
चतुर्थी	लघुने	लघुभ्याम्	लघुभ्यः
पञ्चमी	लघुनः	लघुभ्याम्	लघुभ्यः
षष्ठी	लघुनः	लघुनोः	लघूनाम्
सप्तमी	लघुनि	लघुनोः	लघुषु
सम्बोधनम्	हे लघो/लघु!	हे लघुनी!	हे लघूनि!

कारक

कारकों का सामान्य परिचय उनके चिह्नों के साथ पिछली कक्षा में दिया जा चुका है। कुछ विशेष नियम नीचे दिये जा रहे हैं-

तृतीया

सहयुक्तेऽप्रधाने - सहार्थक शब्दों (सह, साकम् सार्धम् और समम्) के योग में अप्रधान में तृतीया विभक्ति होती है, जैसे- शिष्यः गुरुणा सह विद्यालयं गच्छति। रामः सीतया साकं वनम् अगच्छत्। हनुमान् वानरैः साकं सीताम् अन्वैषयत्।

येनाङ्गविकारः - जिस अङ्ग से अङ्गी में विकार लक्षित होता है, उस अङ्गवाचक शब्द में तृतीया विभक्ति होती है, यथा- देवदत्तः नेत्रेण काणः अस्ति। मोहनः कर्णेन बधिरः अस्ति। रामनाथः शिरसा खल्वाटः अस्ति। शकुनिः पादेन खञ्जः अस्ति।

चतुर्थी

रुच्यर्थानां प्रीयमाणः - रुच् तथा रुच् के अर्थ वाली धातुओं के योग में प्रसन्न होने वाले की सम्प्रदान संज्ञा होती है। अतः उसमे चतुर्थी विभक्ति होती है, जैसे-शिशवे क्रीडनकं रोचते। मह्यं मोदकं रोचते। छात्राय अध्ययनं रोचते।

पञ्चमी

भीत्रार्थानां भयहेतुः - भयार्थक तथा रक्षार्थक धातुओं के साथ भय के कारण में पञ्चमी विभक्ति होती है, जैसे - बालकः सर्पाद् बिभेति। असज्जनात् कस्य भयं न जायते। सज्जनः दुष्टाद् बिभेति। त्रायते महतो भयात्।

समास

समास शब्द का अर्थ है- संक्षेप। जब दो या दो से अधिक पदों को मिलाकर एक पद बनाया जाता है, तो वह समास कहलाता है। दो पदों के बीच समास में प्रथम पद को पूर्वपद एवं द्वितीय पद को उत्तर पद कहते हैं। जब समास को तोड़कर पूर्व स्थिति में ला देते हैं, तो उसे विग्रह कहते हैं। समास छह प्रकार से होते हैं।

1. अव्ययीभाव 2.तत्पुरुष 3.कर्मधारय 4.द्विगु 5. बहुब्रीहि 6.द्वन्द्व

तत्पुरुष - तत्पुरुष समास में उत्तर पद के अर्थ की प्रधानता होती है, जैसे- कृष्णं श्रितः = कृष्णाश्रितः, हरिणा त्रातः = हरित्रातः, लोकाय हितम् = लोकहितम्, घटाय मृत्तिका =

घटमृत्तिका, चोराद् भयम् = चोरभयम्, राज्ञः पुरुषः = राजपुरुषः, सभायां पण्डितः = सभापण्डितः, कूपे पतितः = कूपपतितः।

कर्मधारय - जब एक पद विशेषण होता है तो वह कर्मधारय समास कहलाता है, जैसे -

नीलमुत्पलम्=नीलोत्पलम्। घन इव श्यामः=घनश्यामः। मुखं कमलमिव=मुखकमलम्।

द्वन्द्व - जहाँ दो पदों को जोड़ने वाले च (और) शब्द को हटाकर एक पद बनाया जाता है, वहाँ द्वन्द्व समास होता है। यह दो प्रकार का होता है-

इतरेतरद्वन्द्व - इसमें दोनों पदों की प्रधानता होती है, जैसे रामश्च लक्ष्मणश्च=रामलक्ष्मणौ।

हरिश्च हरश्च=हरिहरौ।

समाहारद्वन्द्व - जिस द्वन्द समास में दोनों पदों के समूह की प्रधानता होती है, वह समाहार-द्वन्द्व कहलाता है, जैसे- पाणी च पादौ च एतेषां समाहारः=पाणिपादम्, अहिश्च नकुलश्च= अहिनकुलम्।

(समाहार-द्वन्द्व हमेशा नपुंसकलिङ्ग, एकवचन में होता है)

उपसर्ग

निर् - निर्+असनम् = निरसनम्, निर् + देशः=निर्देशः, निर् + गतम् = निर्गतम्, निर् + ईक्षणम्= निरीक्षणम्, निर् + नयः=निर्णयः।

उप - उप+नयनम् = उपनयनम् (यज्ञोपवीतसंस्कार), उप+ चारः=उपचारः, उप + वेशनम्=उपवेशनम्, उप+स्थितम्=उपस्थितम्, उप+वासः=उपवासः, उप+ईक्षा=उपेक्षा।

अभि - अभि+नयः=अभिनयः, अभि+भवम्=अभिभवम्, अभि+सारम्=अभिसारम्, अभि+मन्त्रणा=अभिमन्त्रणा, अभि+धानम्=अभिधानम्, अभि+अर्थना=अभ्यर्थना।

अति - अति+क्रमणम्=अतिक्रमणम्, अति+देशः=अतिदेशः, अति+चरः=अतिचरः,अति+शयम्=अतिशयम्।

परि - परि+नयः=परिणयः, परि+धानम्=परिधानम्, परि+चरः=परिचरः, परि+वादः=परिवादः,परि+वर्तनम्=

परिवर्तनम्, परि+हारः=परिहारः।

प्रत्यय

शतृ (अत्) और शानच् (आन) - क्रिया में वर्तमानकालिक सातत्य (निरन्तरता) द्योतित करने के लिए दो प्रत्यय लगाये जाते हैं-शतृ (अत्) एवं शानच् (आन)। शतृ-प्रत्यय परस्मैपदी धातुओं से तथा शानच् प्रत्यय आत्मनेपदी धातुओं से लगाया जाता है। प्रत्यय लगने के बाद जो पद बनते हैं, उनका रूप विशेष्य के अनुसार तीनों लिङ्गों में चलता है, जैसे-

धातु	पुंल्लिङ्ग	स्त्रींलिङ्ग	नपुंसकलिङ्ग
भू	भवन्	भवन्ती	भवत्
अस्	सन्	सती	सत्
श्रु	श्रृण्वन्	श्रृण्वती	श्रृण्वत्
दृश्	पश्यन्	पश्यन्ती	पश्यत्
नी	नयन्	नयन्ती	नयत्
क्री	क्रीणन्	क्रीणती	क्रीणत्
कथ्	कथयन्	कथयन्ती	कथयत्
गम्	गच्छन्	गच्छन्ती	गच्छत्

तुमुन् (तुम्) - जिस क्रिया के लिए कोई क्रिया की जाती है, उस धातु में तुमुन् (तुम्) प्रत्यय लगाते हैं। प्रधान-क्रिया तथा तुमुन्-प्रत्ययान्त क्रिया का कर्ता समान (एक ही) होना चाहिए, जैसे-छात्रः पठितुं विद्यालयं गच्छति। सः स्नातुं नदीं गच्छति। अहं भोक्तंु गृहं गच्छामि। वानरः फलं ग्रहीतुं प्रयतते। छात्रः काशीं गन्तुम् इच्छति। सः कथां श्रोतुं मन्दिरं याति।

क्त्वा (त्वा) और ल्यप् (य) - समानकर्ता वाली दो क्रियाओं में पहले होने वाली क्रिया पूर्णकालिक क्रिया कहलाती है। लेकर, जाकर, खाकर आदि अर्थ बताने के लिए धातु में क्त्वा (त्वा) प्रत्यय लगता है, जैसे-मोहनः भुक्त्वा विद्यालयं गच्छति। यहाँ जाने तथा खाने का काम एक ही कर्ता मोहन करता है। इन दोनों में खाने की क्रिया पहले होती है, अतः भुज् + क्त्वा (त्वा)= भुक्त्वा रूप बना। इसी प्रकार-पठित्वा, गत्वा, नीत्वा, आदि रूप बनते हैं।

इसी अर्थ में यदि धातु के पूर्व कोई उपसर्ग लगा हो या क्त्वा प्रत्ययान्त शब्द समास में प्रयुक्त हो रहे हों तो क्त्वा के स्थान पर ल्यप् (य) प्रत्यय लगता है, जैसे-
आ+नी+ल्यप्(य)=आनीय। प्र+दा+ल्यप् (य)= प्रदाय आदि।

अव्यय तथा इनका वाक्य में प्रयोग

अव्यय अर्थ वाक्य प्रयोग

सम्प्रति (इस समय) - सम्प्रति शिक्षायाः दशा शोचनीया जाताऽस्ति। सम्प्रति कलहो न कार्यः।

साम्प्रतम् (अब/उचित) - साम्प्रतं सायंवेला जाता। सम्प्रति क्रीडनं न साम्प्रतम्।

अहो (सम्बोधन) - अहो ! मधुरं गीतमासां बालिकानाम्। अहो ! महत्कष्टं समापतितम्।

हा (शोक, विषाद, - हा ! मृतोऽसौ मृगः। हा ! कथं स मे भ्राता। हा ! अकाले

आश्चर्य, विस्मय) जलदागमः।

प्रति (ओर, तरफ) - सः विद्यालयं प्रति गच्छति। दीनं प्रति दया कार्या।

दिवा (दिन में) - दिवा न शयनीयम्।

शीघ्रम् (जल्द) - शीघ्रमागच्छ औषधमानेतव्यमस्ति।

सहसा (एकदम, अचानक) - सहसा विदधीत न क्रियाम्।

बहुधा (प्रायः अनेक प्रकार से) - बहुधा त्रुटयो भवन्ति। एकं सद्विप्राः बहुधा वदन्ति।

वाच्य-परिवर्तन

संस्कृत में वाक्य की क्रियाएँ तीन वाच्यों में होतीं हैं - कर्तृवाच्य, कर्मवाच्य और भाववाच्य। सकर्मक धातुओं की क्रिया दो वाच्यों में - कर्तृवाच्य एवं कर्मवाच्य में होती हैं।

1. कर्तृवाच्य -इसमें कर्ता में प्रथमा तथा कर्म में द्वितीया-विभक्ति होती है, जैसे - देवदत्तः ग्रामं गच्छति। रमा ग्रन्थं पठति।

2. कर्मवाच्य - इसमें कर्म में प्रथमा तथा कर्ता में तृतीया-विभक्ति होती है। इन दोनों वाच्यों में क्रिया प्रथमान्त पद के अनुसार होती है, जैसे - देवदत्तेन ग्रामः गम्यते। रमया ग्रन्थाः पठ्यन्ते।

3. भाववाच्य - इसमें कर्ता में तृतीया विभक्ति होती है तथा क्रिया आत्मनेपदी प्रथम पुरुष एक वचन की ही होती है,

जैसे - देवदत्तेन हस्यते। शिशुना रुद्यते।

कर्तृवाच्य से कर्मवाच्य में बदलते समय प्रथमान्त कर्ता में तृतीया-विभक्ति लगाना चाहिए तथा द्वितीयान्त कर्म में प्रथमा-विभक्ति होती है, जैसे -

देवदत्तः ग्रामं गच्छति � देवदत्तेन ग्रामः गम्यते।

सीता ग्रन्थं पठति � सीतया ग्रन्थः पठ्यते।

कर्तृवाच्य से भाववाच्य में बदलने के लिए प्रथमान्त कर्ता में तृतीया-विभक्ति और क्रिया आत्मनेपदी लगाना चाहिए,

जैसे - कर्तृवाच्य कर्मवाच्य

देवदत्तः हसति � देवदत्तेन हस्यते।

शिशुः रोदिति � शिशुना रुद्यते।

धातुरूपाणि

दृश् (पश्य)

लट्लकारः (वर्तमानकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पश्यति	पश्यतः	पश्यन्ति
मध्यमपुरुषः	पश्यसि	पश्यथः	पश्यथ
उत्तमपुरुषः	पश्यामि	पश्यावः	पश्यामः

लोट्लकारः (आज्ञा/प्रार्थना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पश्यतु/पश्यतात्	पश्यताम्	पश्यन्तु
मध्यमपुरुषः	पश्य/पश्यतात्	पश्यतम्	पश्यत
उत्तमपुरुषः	पश्यानि	पश्याव	पश्याम

लङ्लकारः (भूतकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अपश्यत्	अपश्यताम्	अपश्यन्
मध्यमपुरुषः	अपश्यः	अपश्यतम्	अपश्यत
उत्तमपुरुषः	अपश्यम्	अपश्याव	अपश्याम

विधिलिङ्लकारः (विधि/संभावना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पश्येत्	पश्येताम्	पश्येयुः

मध्यमपुरुषः	पश्येः	पश्येतम्	पश्येत
उत्तमपुरुषः	पश्येयम्	पश्येव	पश्येम

लृट्लकारः (भविष्यत्काल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति
मध्यमपुरुषः	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ
उत्तमपुरुषः	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः

नी (ले जाना)
लट्लकारः (वर्तमानकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नयति	नयतः	नयन्ति
मध्यमपुरुषः	नयसि	नयथः	नयथ
उत्तमपुरुषः	नयामि	नयावः	नयामः

लोट्लकारः (आज्ञा/प्रार्थना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नयतु/नयतात्	नयताम्	नयन्तु
मध्यमपुरुषः	नय/नयतात्	नयतम्	नयत
उत्तमपुरुषः	नयानि	नयाव	नयाम

लङ्लकारः (भूतकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्

प्रथमपुरुषः	अनयत्	अनयताम्	अनयन्
मध्यमपुरुषः	अनयः	अनयतम्	अनयत
उत्तमपुरुषः	अनयम्	अनयाव	अनयाम

विधिलिङ्लकारः (विधि/सम्भावना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नयेत्	नयेताम्	नयेयुः
मध्यमपुरुषः	नयेः	नयेतम्	नयेत
उत्तमपुरुषः	नयेयम्	नयेव	नयेम

लृट्लकारः (भविष्यत्काल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नेष्यति	नेष्यतः	नेष्यन्ति
मध्यमपुरुषः	नेष्यसि	नेष्यथः	नेष्यथ
उत्तमपुरुषः	नेष्यामि	नेष्यावः	नेष्यामः

याच् - माँगना (आत्मनेपदी)
लट्लकारः (वर्तमानकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	याचते	याचेते	याचन्ते
मध्यमपुरुषः	याचसे	याचेथे	याचध्वे
उत्तमपुरुषः	याचे	याचावहे	याचामहे

लोट्लकारः (आज्ञा/प्रार्थना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	याचताम्	याचेताम्	याचन्ताम्
मध्यमपुरुषः	याचस्व	याचेथाम्	याचध्वम्
उत्तमपुरुषः	याचै	याचावहै	याचामहै

लङ्लकारः (भूतकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अयाचत	अयाचेताम्	अयाचन्त
मध्यमपुरुषः	अयाचथाः	अयाचेथाम्	अयाचध्वम्
उत्तमपुरुषः	अयाचे	अयाचावहि	अयाचामहि

विधिलिङ्लकारः (विधि/सम्भावना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	याचेत	याचेयाताम्	याचेरन्
मध्यमपुरुषः	याचेथाः	याचेयाथाम्	याचेध्वम्
उत्तमपुरुषः	याचेय	याचेवहि	याचेमहि

लृट्लकारः (भविष्यत्काल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	याचिष्यते	याचिष्येते	याचिष्यन्ते
मध्यमपुरुषः	याचिष्यसे	याचिष्येथे	याचिष्यध्वे
उत्तमपुरुषः	याचिष्ये	याचिष्यावहे	याचिष्यामहे

स्था (तिष्ठ्)

लट्लकारः (वर्तमानकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तिष्ठति	तिष्ठतः	तिष्ठन्ति
मध्यमपुरुषः	तिष्ठसि	तिष्ठथः	तिष्ठथ
उत्तमपुरुषः	तिष्ठामि	तिष्ठावः	तिष्ठामः

लोट्लकारः (आज्ञा/प्रार्थना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
मध्यमपुरुषः	तिष्ठ	तिष्ठतम्	तिष्ठत
उत्तमपुरुषः	तिष्ठानि	तिष्ठाव	तिष्ठाम

लङ्लकारः (भूतकाल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
मध्यमपुरुषः	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
उत्तमपुरुषः	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

विधिलिङ्लकारः (विधि/सम्भावना)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः
मध्यमपुरुषः	तिष्ठेः	तिष्ठेतम्	तिष्ठेत
उत्तमपुरुषः	तिष्ठेयम्	तिष्ठेव	तिष्ठेम

लृट्लकारः (भविष्यत्काल)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	स्थास्यति	स्थास्यतः	स्थास्यन्ति
मध्यमपुरुषः	स्थास्यसि	स्थास्यथः	स्थास्यथ
उत्तमपुरुषः	स्थास्यामि	स्थास्यावः	स्थास्यामः

Table of Contents

1. Table of Contents
2.
3. वैदिक वन्दना
4. प्रथमः पाठः आश्रमः
5. द्वितीयः पाठः मातृदेवो भव
6. तृतीयः पाठ अस्माकम् उत्सवाः
7. चतुर्थः पाठः वर्धमानः महावीरः
8. पञ्चमः पाठः स्फुटपद्यानि
9. षष्ठः पाठः किं तर्तुं जानाति भवान्
10. सप्तमः पाठः सुभाषितानि
11. अष्टमः पाठः ग्राम्यजीवनम्
12. नवमः पाठः भव्या भागीरथी
13. दशमः पाठः शतबुद्धि-सहस्रबुद्धि-कथा
14. एकादशः पाठः रामवनगमनम्
15. द्वादशः पाठः प्रियं भारतम्
16. त्रयोदशः पाठः वीरोऽभिमन्युः
17. चतुर्दशः पाठः वाराणसी नगरी
18. पञ्चदशः पाठः गीतावचनामृतानि
19. षोडशः पाठः अमोघं तद् बलिदानम्
20. सप्तदशःपाठः समे भारतीयाः मिथो बान्धवाः
21. अष्टादशः पाठः राष्ट्रियसञ्चयः

22. ऊनविंश: पाठ: एत बालका:
23. परिशिष्टम् व्याकरणम्
24. शब्दरूपाणि
25. संख्याएँ
26. विशेषण
27. कारक
28. समास
29. उपसर्ग
30. प्रत्यय
31. अव्यय तथा इनका वाक्य में प्रयोग
32. वाच्य-परिवर्तन
33. धातुरूपाणि